शनि की महादशा में पूर्वाषाढ़ा नक्षत्र की दशा का साधन पूर्वोक्त साधन रीति से ही करना चाहिए। शेष उत्तराषाढ़ा, अभिजित्, व श्रवण की दशा का साधन इस प्रकार करने में सरलता व सहजता रहेगी। यहाँ पर नक्षत्रों का भोगमान न्यूनाधिक होने पर भी दशावर्षादि मान समान ही रहते हैं। अर्थात् प्रत्येक नक्षत्र की दशा का मान २ वर्ष ६ माह यानि अढ़ाई वर्ष ही रहेगा। दशा साधन करते समय जन्म के स्पष्ट चन्द्र को देखकर, किसकी महादशा में जन्म हैं. यह समझ लेना चाहिए। जैसे कि तात्कालिक स्पष्ट चन्द्र यदि ८। २६। ४० से अधिक तथा ९। ६। ४०। ० से कम हो, तो उत्तराषाढ़ा की दशा होगी। यहाँ जन्मकालिक चन्द्र ९। ६। ४०। ० से अधिक ९।१०।५३।२० से कम हो, तो अभिजित् की दशा होगी एवं ९।१०।५३।२० से अधिक तथा ९। २३। २०। ० से कम चन्द्र के होने पर श्रवण की दशा होगी। दशा का निर्णय करके जन्म के चन्द्र में गत नक्षत्र के चन्द्र को घटाने से वर्तमान चन्द्र में नक्षत्र का राश्यादि शेष रहेगा। इसे और स्पष्ट करते हैं— जैसाकि ऊपर कहा जा चुका है, उत्तराषाढ़ा नक्षत्र की अन्तिम १५ घटी और श्रवण के आरम्भ की ४ घटी मिलकर अभिजित् नक्षत्र होता है। यहाँ १५ घटी सम्पूर्ण नक्षत्र भोगमान ६० घटी का चतुर्थांश है, एक नक्षत्र का अंशात्मक योग १३°२०' का होता है, इसका चतुर्थांश ३ अंश २० कला भोग नक्षत्र के एकपाद १५ घटी के प्राय: समतुल्य माना जाता है। इसी प्रकार ४ घटी नक्षत्र के सम्पूर्ण भोग काल ६० का १५ वाँ भाग है। अत: ४ घटी = १३ अंश २० कला ÷ १५ = ०°। ५३'। २०" होगा। इस प्रकार अभिजित् का सम्पूर्ण मान ३°। २०' + ०°। ५३'। २०" = ४° १३' २०" होगा। वहाँ उत्तराषाढ़ा के अन्त के ३° २०' घट जाने से उत्तराषाढ़ा का सम्पूर्ण मान १३'। २० — ३'। २०" = १०° का ही होगा। ८रा। २६°। ४०'। ००" से उत्तराषाढ़ा नक्षत्र प्रारम्भ होता है। उत्तराषाढ़ा का उक्त सम्पूर्ण मान १०° को इसमें संयुक्त करने से ८रा। २६°। ४०'। ०" + १०° = ९रा। ६°। ४०'। ०" उत्तराषाढ़ नक्षत्र का अन्त विन्दु होगा। भचक्र में ८रा। २६°। ४०'। ०" से ९रा। ६°। ४०'। ०" तक उत्तराषाढ़ा का विस्तार क्षेत्र होगा तथा ९रा। ६°। ४०'। ०" से ९रा। १०°। ५३'। २०" तक श्रवण नक्षत्र का विस्तार होगा। इस प्रकार —

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शनि दशा में अभिजित ज्ञान तालिका

नक्षत्र —	पू.षा.	उ.षा.	अभिजित्	श्रवण
दशेश —	शनि	शनि	शनि	शनि
चन्द्रस्पष्ट रा.	८	९	९	९
अं.	२६	६	१०	२३
क.	४०	४०	५३	२०
वि.	०	०	२०	०
नक्षत्रभोग कलादि	८००'/०	६००'/०	२५३'/२०"	७४६'/४०"
दशावर्ष शनिदशा १० वर्ष	२.५	२.५	२.५	२.५
दशामास	३०	३०	३०	३०

उत्तराषाढा का सम्पूर्ण मान १०° = ६००'
अभिजित् का सम्पूर्ण मान ४°।१३'।२०" = २५३'।२०"
और श्रवण का सम्पूर्ण मान १२°।२६'।४०" = ७४६'४०" होगा
स्पष्टीकरण के लिए अधोलिखित तालिका का अवलोकन करें।

अब यदि कल्पना करें कि जन्मकालिक चन्द्र का स्पष्ट राश्यादि भोग्य ९ग।८°।१२'।५६" है। तब आर्द्रादि नक्षत्र गणना क्रम से जन्म नक्षत्र अभिजित् होगा क्योंकि चन्द्र का राश्यादि भोग ९ग।६°।४०'।० से अधिक और ९ग।१०°।५३'।२०" से न्यून है। शनि की महादशा में जन्म है। शनि की महादशा पूर्वाषाढ़ा, उत्तराषाढ़ा अभिजित् और श्रवण चार नक्षत्रों की है। शनि दशा के नक्षत्रों में अभिजित् तीसरा नक्षत्र है। चन्द्रमा के राश्यादि भोग में उत्तराषाढ़ा के राश्यादि मान को घटाने से शेष चन्द्र का भुक्त भाग होगा। चन्द्रमा के इस उक्त भाग की कलादि बनाकर अभिजित् के दशामान २.५ वर्ष से गुणाकर अभिजित् के सम्पूर्ण कलादि मान २५३' २०" से भाग देने पर अभिजित् नक्षत्र दशा का भुक्त काल होगा। इस भुक्तकाल में अपने पूर्ववर्त्ती सभी ग्रह नक्षत्रों पूर्वाषाढ़ा और उत्तराषाढ़ा के दशा वर्ष २.५ + २.५ = ५ वर्ष जोड़ने से शनि की महादशा के भुक्त वर्षादि प्राप्त होंगे।

चन्द्रमा का भोग राश्यादि = ९ग।८°।१२'।५६"
उत्तराषाढ़ा का नक्षत्र भोग मान = —९ग।६°।४०'।०"
शेष — = ०ग।१°।३२'।५६"
= ९२'।५६"

 CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अब यहाँ अभिजित् के इस भुक्त कलादि को उसके वर्षमान २.५ वर्ष से गुणाकर अभिजित् के सम्पूर्ण कलादि मान २५३° २०' से भाग देने पर अभिजित् के भुक्त वर्षादि लब्ध होंगे। अत:

$$\text{अभिजित् दशा के भुक्त वर्षादि} = \frac{९२'\,५६'' \times २.५ \text{ वर्ष}}{२५३'|२०''}$$

$$= \frac{५५७६'' \times २.५}{१५२००''} = \frac{१३९४०}{१५२००}$$

अत:

१५२००) १३९४० (० वर्ष ११मास ०दिन ९घटी २८पल भुक्त वर्षादि

× १२
१६७२८०
१५२००
×१५२८०
१५२००
××× ८०
× ३०
२४००
× ६०
१४४०००
१३६८००
××७२०० × ६०
४३२०००
३०४००
१२८०००
१२१६००
× ६४००

इस प्रकार गत नक्षत्रों के भुक्त वर्षादि = ५।०।०।०।० लब्धि में जोड़ने पर शनि महादशा का भुक्त वर्षादि = ५।११।०।९।२८ इसलिए भोग्य वर्षादि = १०।०।०।०।०
− ५।११।०।९।२८
४।०।२९।५०।३२ वर्षादि हुए।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शेष सब पूर्ववत् करना है। दशाचक्र भी विशोंत्तरी की तरह ही बनाया जाता है।

योगिनी दशा विचार—

विंशोत्तरी दशा के साथ योगिनी दशा भी व्यावहारिक दृष्टिकोण से अतिमहत्वपूर्ण व अत्यावश्यक समझी जाती है। इसमें आठ योगिनियों की दशा होती हैं। वे योगिनियाँ मङ्गला, पिङ्गला, धान्या, भ्रामरी, भद्रिका, उल्का, सिद्धा और संकटा नाम से जानी जाती हैं, जो अपने नाम के अनुसार जातक को अपनी दशाकाल में शुभाशुभ फल देती हैं। यथा—

मङ्गला पिङ्गला धान्या भ्रामरी भद्रिका तथा।
उल्का सिद्धा संकटा च फलमासां स्वनामवत्।।

एवं इन योगिनियों से उद्भूत सूर्यादि ग्रह को माने जाते हैं। मङ्गलादि योगिनियों में मङ्गला से चन्द्र, पिङ्गला से सूर्य, धान्या से गुरु, भ्रामरी से मङ्गल, भद्रिका से बुध, उल्का से शनि, सिद्धा से शुक्र और संकटा से राहु जन्य हैं। योगिनी दशा ज्ञान के लिए अश्निन्यादि से जन्मनक्षत्र तक की संख्या में तीन जोड़कर आठ (८) से भाग देने पर एकादिशेष तुल्य मङ्गलादि योगिनी की दशा होती है। अर्थात् एक शेष से मङ्गला, दो से पिङ्गला, ३ से धान्या, ४ से भ्रामरी, ५ से भद्रिका, ६ से उल्का, ७ से सिद्धा और ८ शेष से संकटा की दशा समझनी चाहिए। यथा—

स्वर्क्षं पिनाकिनयनयुक्तं च वसुभिर्हरेत्।
शेषेण योगिनी ज्ञेया शून्य पातेन संकटा।।

इन योगिनियों के उपरोक्त नाम—क्रम संख्या तुल्य दशा वर्ष होते हैं, जैसे कि मङ्गला का १ वर्ष, पिङ्गला का २, धान्या का ३, भ्रामरी का ४, भद्रिका का ५, उल्का का ६, सिद्धा का ७ और संकटा का ८ वर्ष दशा समझनी चाहिए। इन अष्टयोगिनी दशावर्षों का योग ३६ होते हैं। अत: यह दशा जातक के जीवन में पुनरावृत्ति में आती हैं। जिससे जीवन पर्यन्त की दशास्थिति का विचार किया जाता है। विंशोत्तरी दशा की तरह ही इस दशा का साधन भयात—भभोग पर से अथवा स्पष्ट चन्द्रकला से क़िया जाता है। यथा—

'दशाब्दा: क्रमशस्त्वेषामेकादेकाधिका: स्मृता:।
भुक्त भोग्यादिकं साध्यं तद् भयात—भभोगत:।।' बृ.पा. हो.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जैसे— पूर्वोक्त उदाहरण में भयात १२।५७।(७७७ पल) और भभोग ५४।२० (३२६० पल) को विंशोत्तरी दशा की तरह अनुपात करते हैं— जन्म नक्षत्र श्रवण है।

$$\text{अतएव भुक्त वर्षादि} = \frac{\text{भयात} \times \text{दशावर्ष}}{\text{भभोग}} = \frac{\text{७७७} \times \text{१ मंगलादशावर्ष}}{\text{३२६०}}$$

= ० वर्ष २ मास २५ दिन ४८ घटी १३ पल।

मंगलादशावर्ष = १।०।०।०।०
भुक्तवर्षादि = —०।२।२५।४८।१३
भोग्यवर्षादि = ०।९।४।११।४७

तथा इसकी अन्तर्दशा के लिए विंशोत्तरी की तरह ही दशा × दशा ÷ ३६ परमायु = वर्षादि योगिनी अन्तर्दशा हो जाती है। शेष आगे दशान्तर्दशा, बोधार्थ तालिका से स्पष्ट होगा। इसकी दशा तालिका का लेखन विंशोत्तरी की तरह ही किया जाता है।। ३ ।।

इति दोरमा (सहरसा, बिहार) निवासिना मैथिलेन
श्री सूर्यनारायणात्मजेन डा० सुरकान्त झेत्यनेनुड्डुदाय प्रदीपे सान्वय—क्षेमङ्करी
हिन्दी—विमर्शेषु संकल्पाध्याय प्रथम:।।

❖ ❖ ❖

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योगिनी दशान्तर्दशा बोधार्थ तालिका

योगिनीग्रह	मंगल-चन्द्र	पिङ्गला-सूर्य	धान्या-गुरु	भ्रामरी-मंगल	भद्रिका-बुध	उल्का-शनि	सिद्धा-शुक्र	संकटा-राहु
दशावर्ष	१	२	३	४	५	६	७	८
नक्षत्र	आ., चि. श्र.	पुन., स्वा. धनि.	पु., वि. शत.	अ., श्ले. अनु., पू.भा.	भ.,म., ज्ये., उ.भा.	कृ., पू.फा. मू., रे	रो., उ.फा. पू.षा.	मृ., ह., उ.षा.
सभी योगिनी में उनकी ही अन्तर्दशा	यो. मा. दि.	यो. मा. दि.	यो. मा. दि.	यो. मा. दि.	यो. मा. दि.	यो. मा. दि.	यो. मा. दि.	यो. मा. दि.
	मं. ० १०	पिं. १ १०	धा ३ ०	भ्रा ५ १०	भ ८ १०	उ १२ ०	सि १६ १०	सं २१ १०
	पिं ० २०	धा २ ०	भ्रा ४ ०	भ ६ २०	उ १० ०	सि १४ ०	सं १८ २०	मं २ २०
	धा १ ०	भ्रा २ २०	भ ५ ०	उ ८ ०	सि ११ २०	सं १६ ०	मं २ १०	पिं ५ १०
	भ्रा १ १०	भ ३ १०	उ ६ ०	सि ९ १०	सं १३ १०	मं २ ०	पिं ४ २०	धा ८ ०
	भ १ २०	उ ४ ०	सि ७ ०	सं १० २०	मं १ २०	पिं ४ ०	धा ७ ०	भ्रा १० २०
	उ २ ०	सि ४ ००	सं ८ ०	मं १ १०	पि ३ १०	धा ६ ०	भ्रा ९ १०	भ १३ १०
	सि २ १०	सं ५ १०	मं १ ०	पिं २ २०	धा ५ ०	भ्रा ८ ०	भ ११ २०	उ १६ ०
	सं २ २०	मं ० २०	पिं २ ०	धा ४ ०	भ्रा ६ २०	भ १० ०	उ १४ ०	सि १८ २०

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथसंज्ञाध्याय: —२

अथैतच्छास्त्रेऽन्यशास्त्रतोविशेषतामाह—

बुधैर्भावादय: सर्वे ज्ञेया: सामान्यशास्त्रत:।
एतच्छास्त्रानुसारेण संज्ञां ब्रूमो विशेषत:।।१।।

अन्वय: —बुधै: सर्वे भावादय: सामान्यशास्त्रत: ज्ञेया:। एतत् शास्त्रानुसारेण संज्ञां विशेषतो ब्रूम:।।१।।

संस्कृत—बुधैर्विद्वद्भि: भावादय: सर्वे पदार्था: सामान्यशास्त्रत: प्रचलितान्यग्रन्थेभ्यो ज्ञेया: ज्ञातव्या:। एतच्छास्त्रानुसारेण विशेषत: शुभाशुभसंज्ञां वा विशेष पदाद्वक्ष्यमाणात्संज्ञां ब्रूम इति। अथ प्रसङ्गाद्भावादि संज्ञा—

तनु १ धन २ सहज ३ सुहृत् ४ सुत ५ रिपु ६ जाया ७ मृत्यु ८ धर्म ९ कर्मा १० ऽऽया: ११ व्यय १२ इति लग्नादीनां संज्ञा: प्रोक्ता: पुराविद्भि:।

कालात्मा दिनकृन्मनस्तु हिमगु: सत्वं कुजो ज्ञो वचो।
जीवो ज्ञानसुखे सितश्च मदनो दु:खं दिनेशात्मज:।।

राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुध:।
सूरिर्दानवपूजितश्च सचिवौ प्रेष्य: सहस्रांशुज:।।

अनेन क्रमेण राशीशव्यवस्था। राजानो हि स्वतन्त्रधियो भवन्ति तेन स्व-स्वस्वभावानुरूपौ राशी कर्कट सिंहौ चन्द्रादित्यावङ्गीकृतौ। ततस्ताभ्यां यथाधिकारवशाद्ग्रहेभ्यो राशयो दत्ता:।

राजकुमाराय बुधाय चन्द्रमा मिथुने रवि: कन्यां च दत्तवान्। एवं बुधो द्विराशिप:। ततो मन्त्री शुक्र: वृष तुलाधीश:। तत: सेनापतिर्भौम: मेषवृश्चिकयो: स्वामी। ततो गुरुर्धनुर्मीनयोरधिपति: ततो—भृत्य: शनि: मकर कुंभेश:। यथोक्तं होरामकरन्दे।

कण्ठीरवं विक्रमिणं विलोक्य स्वीयं पदं तत्र चकार सूर्य:।
मैत्र्या तदा सन्नतया कुलीरे निजं बबन्ध्यालयमेणलक्ष्मा।।

अन्येग्रहागृहयियाचिषया क्रमेण शीतांशुतिग्ममहसो: सघनं समीयु:।
प्राप्तक्रमेण ददतुर्भवनानि तौ तु ताराग्रहा द्विभवनास्तत एव जाता:।।

क्षितिजसितज्ञचन्द्ररविसौम्यसितावनिजा:।
सुरगुरुमन्दसौरिगुरवश्च गृहांशकपा:।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अजमृगतौलिचन्द्रभवनादिनवांशविधिः।
भवनसमांशकाधिपतयः स्वगृहात्क्रमशः॥

कुजरविजगुरूज्ञशुक्रभागाः पवनसमीरणकौर्पिजूकलेयाः।
अयुजि युजितुभे विपर्ययस्थाः शशिभवनालिझषान्तमृक्षसन्धिः॥

क्रूरः सौम्यः पुरुषवनिते ते चरागद्विदेहाः।
प्रागादीशाः क्रिय वृषनृयुक्कर्कटाः सत्रिकोणाः॥

मार्तण्डेन्द्वोरयुजिसमभेचन्द्रभान्वोश्चहोरे।
द्रेष्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्॥

क्षेत्रं होरा दृक्कसप्ताङ्कसूर्यत्रिंशद्भागाः सप्तवर्गा निरूक्ताः।
ओजेतस्माद्युग्मभे सप्तमाच्च राशीशा ये सप्तवर्गाधिनाथा॥

वास्तव दशवर्गाः।

क्षेत्रंहोरात्र्यागनन्दाख्य भागा दिग्भूपालत्रिंशदंशाभिधानाः।
ज्ञेया मेषादर्कषष्ठ्यंशभागी राशेर्ज्ञेयौ जातकज्ञैः फलार्थम्॥१॥

क्षेमङ्करी—विद्वज्जनों को प्रचलित एवं मान्य ग्रन्थों से द्वादश भाव राशि, लग्न, ग्रह और अन्यान्य सम्बन्धित सामान्य विषयों की जानकारी करके इस उडुदाय-प्रदीप नामक ग्रन्थ विशेष का अध्ययन व मनन करना चाहिए, क्योंकि यहाँ केवल 'बृहत्पाराशर होराशास्त्र' के भावादिक शुभाशुभफल ज्ञान के गुढ़ व विशिष्ट सिद्धान्तों को सहज व सरल प्रकार से कहते हैं॥१॥

विमर्श—यहाँ उडुदायप्रदीप नामक इस ग्रन्थ को समझने समझाने की योग्यता की ओर ग्रन्थकार ने 'बुधैरि'ति कहकर स्पष्ट संकेत किया है। अतः इस ग्रन्थ के अध्येता के लिए यह आवश्यक है कि वह विद्वान् हो, त्रिस्कन्ध सिद्धान्त–संहिता–होरा शास्त्र में उनकी गति हो तथा द्वादश भाव-राशि–लग्न के साथ नव ग्रहों के अन्तर-सम्बन्ध और उनके विश्वब्रह्माण्डस्थ चराचर पर पड़ने वाले प्रभावों के विश्लेषण की क्षमता वाला हो। ऐसी योग्यता वाला अध्येता ही इस ग्रन्थ के अनुसार भावादिकों के शुभाशुभ फलों का सही विश्लेषण कर आत्मसेंचन कर सकता है। फिर भी इस ग्रन्थ के सामान्य जिज्ञासु पाठाकों के हितार्थ यहाँ फलित विज्ञान के प्रारम्भिक विषय वस्तुओं को संक्षेप में दिये जा रहे हैं, जिससे इस ग्रन्थ का समझ वनाने में समर्थ हो सकें।

एवं होराशास्त्र में जन्म या प्रश्न के समय के आधार पर निरूपित आकाशीय

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मानचित्र अर्थात् कुण्डली से जातक के या पृच्छक के शुभाशुभ फल को प्रस्तुत किया जाता है। उस कुण्डली में द्वादश खाने बने होते हैं। जिन खानों को ही भाव कहा जाता है। उसका प्रथम खाना या भाव लग्न कहलाता है। पूर्वी क्षितिज में आकाश का जो भाग पृथ्वी से लगा रहता है, उसे ही उदय-लग्न या प्रथम लग्न कहते हैं। उससे ठीक सामने पश्चिमीय क्षितिज में अस्त या सप्तमलग्न या भाव है। इस प्रकार जहाँ हम खड़े होते हैं, बिल्कुल-हमारे सिर पर जो आकाश का भाग होता है, वह है दशम भाव और जहाँ हमारे पैर होते हैं, बिल्कूल उसके नीचे पृथ्वी के नीचे, जो आकाश का भाग होता है, वह चतुर्थ भाव होता है। इनके अतिरिक्त कोणात्मक खाने द्वितीय-तृतीय, पंचम-षष्ठ, अष्टम-नवम और एकादश-द्वादश भाव के रूप में जाने जाते हैं। वस्तुत: इन द्वादश खानों या भावों में आकाशस्थ क्रान्ति वृत्तीय मेषादि द्वादश राशियों की स्थिति से ही उन भावों का उद्बोधन होता है। इस प्रकार लग्न की परिभाषा दी जाती है कि- 'उदय क्षितिज में इष्ट काल में जो राशि लगी रहती है, वह राशि लग्न कहलाता है।' अतएव सूर्य का उदय जिस राशि में होता है, उस दिन का प्रथम लग्न, वही सूर्य भुक्त राशि होती है। इस तरह उदय से उदय पर्यन्त अहोरात्र में १२ राशियाँ विभिन्न इष्टकालों में क्रमश: उदित होती हैं। अर्थात् एक अहोरात्र में १२ लग्न व्यतीत होते हैं।

आप यह जानते हैं कि नक्षत्रों के समूह राशि कहलाती है। सुदूर आकाश में जहाँ तारायें देख पड़ती हैं,वह भगोल (क्रान्ति वृत्त) कहलाता है। उसका तुल्य २७ विभाग अश्विनी आदि २७ नक्षत्रों के नाम से जाने जाते हैं। उसी अश्विनी नक्षत्र से उक्त भगोल के समान द्वादश भाग मेष आदि नाम से १२ राशियाँ जगत्प्रसिद्ध हैं। इस प्रकार द्वादश भाव, द्वादश उदय लग्न और द्वादश राशियाँ ग्रहों के योग से चराचर जगत् को प्रभावित करते हैं।

भारतीय ज्यौतिष में वे नौग्रह माने गए हैं। १. सूर्य २. चन्द्र ३. मंगल, ४. बुध, ५. गुरु, ६. शुक्र, ७. शनि, ८. राहु, ९. केतु। ग्रह वह है, जो चराचर को प्रभावित करने या फल देने के लिए उसको अपने अधीन कर लेते हैं। या ग्रहण कर लेते हैं या पकड़ लेते हैं। यथा— 'गृह्णाति फलदातृत्वेन चराचरान् इति ग्रह:'

यह ग्रहशब्द ग्रह् (ग्रहण करना) धातु से अच् प्रत्यय होने से बना है। वहीं ज्यौतिषीय सिद्धान्त दृष्ट्या ग्रह शब्द की व्युत्पत्ति इस प्रकार भी करने की परम्परा है। यथा—

'गृह्णाति गति विशेषान् वक्रानुवक्रकुटिलेति प्रभृतीन् इति ग्रह:।।'

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जहाँ कि सिद्धान्तकारों ने ग्रहों की विलक्षण अष्टधा गति माने हैं- गतियों के नाम हैं– वक्र, अनुवक्र, कुटिल, मन्दा, मन्दतरा, समा, शीघ्रतरा और शीघ्रा। साधारणतया ग्रह की मार्गी व वक्री गति ही मानी जाती है।

उक्त नवग्रहों में सूर्य और चन्द्र नित्य मार्गी तथा राहु और केतु नित्य वक्री ग्रह हैं। शेष मंगलादि पञ्चतारा ग्रह अनित्य गतिक अर्थात् मार्गी व वक्री होते रहते हैं। सूक्ष्म फलित के लिए अष्टधा गति ज्ञान आवश्यक है।

उपरोक्त नवग्रहों में भारतीय मनीषियों ने सूर्य व चन्द्र को प्रकाशक ग्रह और मंगलादि पञ्चतारा ग्रहों को तारा ग्रह एवं राहु–केतु को तमो या छाया ग्रह कहा है। ये नव ग्रह आकाशीय अपनी अपनी कक्षा में पृथ्वी के चारों ओर चक्रमण करते हुए माने गए हैं, यहाँ यह ध्यान रखना चाहिए कि आधुनिक मान्यतानुसार सूर्य स्थिर है और उसके चारों ओर सभी ग्रह चक्रमण करते हैं। लेकिन हमारे पूर्वाचार्यों ने पृथ्वी को स्थिर आधार और नव ग्रह को भ्रमणशील माना है। प्रतीत होता है कि ग्रहगणित की जटिलता को सरल बनाये रखने के लिए अपना स्थिर आधार मानना, उनके लिए आवश्यक रहा हो। फिर पृथ्वी पर बैठकर ग्रह वेध करने के कारण भी पृथ्वी को स्थिर मानना आवश्यक समझा हो। क्योंकि हमारे सिद्धान्त ग्रन्थों में सभी ग्रहमान पृथ्वी से ही उपलब्ध हैं। अस्तु।

वे ग्रह पृथ्वी के केन्द्र से अपनी अपनी कक्षा में मध्यमागति से भ्रमण करते हुए लगभग एक मास में सूर्य, बुध व शुक्र एक राशि भोग करते हैं, मंगल ४५ दिन में, गुरु लगभग १ वर्ष में, शनि ढाई वर्ष में, राहु व केतु एक वर्ष छः मास में और चन्द्र सवा दो दिन (२¼ दिन) में एक–एक राशि का भोग करने में सफल होते हैं। इन ग्रहों को महर्षि पाराशर ने देवतांशक माना है। यथा–

रामः कृष्णश्च भो विप्र ! नृसिंह सूकरस्तथा।
एते पूर्णावतारश्च ह्यन्ये जीवांशकान्विता।।
रामोऽवतारः सूर्यस्य चन्द्रस्य यदुनायकः।
नृसिंहो भूमिपुत्रस्य बुद्धः सोमसुतस्य च।।
वामनो विबुधेज्यस्य भार्गवो भार्गवस्य च।
कुर्मो भाष्करपुत्रस्य सैंहिकेयस्य सूकराः।।
केतोर्मीनावतारश्च ये चान्ये तेऽपि खेटजाः।
परात्मांशोऽधिको येषु ते सर्वे खेचराभिधाः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इस प्रकार उपरोक्त समालेखन से भाव—राशि—लग्न और ग्रह के होरास्कंध में मूलत: महत्वपूर्ण स्थान हैं, स्पष्ट हो जाता है और यह भी पता चलता है कि इस स्कंध में निश्चित काल विन्दु का विशेष महत्त्व है। जिसे इष्टकाल के नाम से जाना जाता है। भारतीय ज्योतिष में काल गणना प्राय: सूर्योदय से ही की जाती है। अतएव होराशास्त्र में भी इष्टकाल की सूर्योदय से ही गणनाकर उसे घटी। पल में लाने की परम्परा है। और उस इष्टकाल से साधित लग्न से बनी कुण्डली (जन्म या प्रश्नकालिक) जातक के शुभाशुभ फलों को जानने में उपयोग किया जाता है। अत: वक्ष्यमाण प्रकार प्रस्तुत ग्रंथ के विशिष्ट शुभाशुभ फल विचार करने में उपयोगी विषयों की जानकारी जिज्ञासुओं के हितार्थ दी जा रही है।

उपर्युक्त कुण्डली में १२ भाव होते हैं, उनमें प्रथम लग्न माना जाता है। उस लग्नादि १२ भावों की विशिष्ट संज्ञायें कही गई हैं। जो तनु, धन, सहज, सुहृत्, सुत, रिपु, जाया, मृत्यु, धर्म, कर्म, आय और व्यय के नाम से ऊपर कहा गया है। उन प्रत्येक भावों की भी विशेष संज्ञायें जातक ग्रन्थों में कही गई हैं— जैसे— १,५,९ भाव की त्रिकोण, ९ भाव की त्रित्रिकोण, १,४,७,१० भावों की केन्द्र, चतुष्पद, कण्टक आदि संज्ञायें हैं। ४,८ भाव को चतुरस्त्र, ३,६,१०,११ भावों को उपचय, १,२,४,५,७,८,९ और १२ भावों को अनुपचय, पीडर्क्ष कहा गया है। वहीं ६,८ और १२ भावों को त्रिक, २व ७ को मारक, ३ व ८ आयु, २,५,८ और ११ को पणफर, ३,६,९ और १२ को आपोक्लीम आदि नाम से जाना जाता है। राशि चक्र के १२ राशियों में सिंहादि ६ राशियों के क्रम से स्वामी सूर्य और कर्कादि ६ राशियों के व्युत्क्रम से स्वामी चन्द्रमा होते हैं। इनमें उग्र प्रकृति और शीत प्रकृति के सिंह और कर्क राशियों को सूर्य और चन्द्र ने अपना अपना स्थान बनाया। इसके बाद जैसे—जैसे अधिकारी ग्रहों ने स्थान की याचना की वैसे वैसे दोनों ने उन ग्रहों को अपने अपने अधिकार की एक एक राशि दिये। इसलिए शेष सभी ग्रह दो दो राशियों के स्वामी बने। अन्य बहुत सी बातें संस्कृत टीका में कही जा चुकी है, विशेष यह कि फल कथन में दशवर्ग की आवश्यकता पड़ती है। गृह, होरा, द्रेष्काण, सप्तमांश, नवमांश, दशमांश, द्वादशांश, षोडशांश, त्रिशांश और षट्यंश ये दशवर्ग कहलाते हैं। इनमें द्वादशांश और षष्ट्यंश जिसराशि में देखना हो, उस राशि तथा से शेष आठ मेषादि से ही सर्वदा देखी जाती है। इस सम्बन्ध में विशेष अन्यत्र देखें ।।१।।

अथैतद् ग्रह दृष्टि विशेषतामाह—

पश्यन्ति सप्तमं सर्वे शनिजीवकुजा: पुन:।
विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान् ।। २ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वयः —सर्वे (ग्रहाः) सप्तमं पश्यन्ति पुनश्च विशेषतः शनिजीवकुजादयः क्रमेण त्रिदशत्रिकोणचतुरष्टमान् पश्यन्ति।। २।।

संस्कृत—पश्यन्तीति। स्वाधीष्ठितस्थानात्सप्तमं स्थानं सर्वे ग्रहाः पश्यन्ति पुनः शनिजीवकुजाः क्रमेण विशेषतः त्रिदशत्रिकोणचतुरष्टमान् पश्यन्ति। त्रिदशं तृतीयं दशमं च शनिः पूर्णदृशाऽवलोकयति। त्रिकोणं नवमं पञ्चमं च गुरुः पूर्ण दृशाऽवलोकयति। चतुर्थमष्टमञ्च भौमः पूर्ण दृशापश्यति। ननुदृष्टिविषयको विशेषा ग्रन्थान्तरतःसिद्ध एवात्रस्थलेखनं किमर्थं तत्रोच्यते ग्रन्थान्तरेषु त्रिदशत्रिकोणचतुरस्रसप्त-मानित्यादिना ग्रहाणां पाददृष्टिरभिहिता अत्र तु पूर्णदृष्टिरेवाचार्यस्याभिमता तेनात्रग्रथनं समीचीनमिति। एवमेतेषां पूर्णदृष्टौ विशेषत्वे कारणं पूर्वैः कल्पितम् यथास्वस्वस्थानात् सप्तमं कलत्रस्थानं जाया रक्षणं सर्वेषामावस्यकम् उक्तमपि —

स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च।
स्वं च धर्म प्रयत्नेन जायां रक्षन्हि रक्षति।।

तेन सर्वे ग्रहाः सप्तमं पूर्णं पश्यन्ति प्रतिक्षणं तत्स्थानं मनसि स्मरन्तीतिभाव एवमेव तृतीयं पराक्रमस्थानं दशमं राज्यस्थानं शनिः भृत्यः राज्ञो राज्यरक्षा बलरक्षा च भृत्यस्य मुख्यं कर्म अतः शनिस्तृतीयं दशमं सप्तमं च पूर्णदृशावलोकयति। चतुर्थं सुखस्थानम् अष्टममरिष्टस्थानम्। दुर्ग स्थानं च। भौमस्तुसेनानायकः। राज्ञः सुखरक्षणं दुर्ग रक्षणं च सेनाधीशस्याऽऽवस्यकन्तेन चतुरष्टमं भौमः पूर्ण दृशा पश्यति। तथा पञ्चमं विद्यास्थानम्। नवमं धर्म स्थानम्। विद्या शिक्षणं धर्मशिक्षणं च गुरोः मुख्यं कर्म तेन बृहस्पतिः नवमं पञ्चमं च पूर्णदृशावलोकयतीति।। २।।

क्षेमङ्करी—सप्तम (जाया) भाव को सभी ग्रह पूर्ण दृष्टि से देखते हैं। शनि, गुरु और मंगल सप्तम के अतिरिक्त स्थान जैसे शनि तृतीय—दशम स्थानों, गुरु नवम व पंचम स्थानों और मंगल चतुर्थ व अष्टम स्थानों को भी पूर्ण दृष्टि से देखते हैं। इस ग्रन्थ में पूर्ण दृष्टि ही महत्वपूर्ण मानी गई है।

विमर्श—विभिन्न जातक ग्रन्थों में ग्रहों की पूर्ण दृष्टि के अतिरिक्त दृष्टि भी मानी गई है। जैसे— पूर्ण दृष्टि, एक पाद दृष्टि, द्विपाद दृष्टि और त्रिपाद दृष्टि। वहीं सभी ग्रह जाया स्थान को पूर्ण दृष्टि से देखते हैं। जबकि शनि ७,३,१० को, गुरु ७,९,५ को मंगल ७,४,८ को पूर्ण दृष्टि से ही देखते हैं। यहाँ अभिप्राय यही है कि पाराशर मत पूर्ण दृष्टि को ही मानता है। जहाँ शनि, गुरु और मंगल की अतिरिक्त दृष्टि भी पूर्ण मानी गई। यही इस सम्प्रदाय की विशिष्टता है।। २।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ ग्रहणां तात्कालिकशुभत्वाशुभत्वं श्लोकेनाह—

सर्वे त्रिकोणनेतारो ग्रहाः शुभफलप्रदाः।
पतयस्त्रिषडायानां यदि पापफलप्रदाः।। ३।।

अन्वयः—त्रिकोणनेतारः सर्वे ग्रहाः शुभफलप्रदाः भवन्ति। यदि तु सप्त एव ग्रहाः त्रिषडायानां पतयः तर्हि पापफलप्रदाः भवन्ति।। ३।।

संस्कृत—सर्वेति—त्रिकोणनेतारः पञ्चमनवमेशाः सर्वे ग्रहाः शुभाः पापाश्च शुभफलप्रदाः यदि त्रिषडायानां पतयस्तर्हि पापफलप्रदाः। परमस्मिन्नर्थे महान्दोषः। रविचन्द्रौ विहाय सर्वे ग्रहा राशिद्वयाधिपाः। तत्रैको राशिर्विषमः द्वितीयः समः। तेन ये ग्रहाः विषमभावाधिपास्ते पुनर्विषमभावपतयो न भवितुमर्हन्ति किन्तु ते समभावाधिपा एव तेन त्रिकोणेशौ तृतीयलाभाधिपौ न भवितुमर्हतः केवलं षष्ठेशौ भवितुमर्हतः तेन त्रिकोण नेतारो यदि षष्ठपतयः तदा न शुभाः इत्येव वक्तुं योग्यम् अथ वास्तविकोर्थः। यदि त्रिकोणनेतारः त्रिकोणस्वामिनः सर्वेग्रहाः ग्रन्थान्तरोक्ताः शुभा वा पापाः शुभफलदाः तदा त्रिषडायानां तृतीयषष्ठैका दशानां पतयस्तु पापफलप्रदाः अर्थादत्र त्रिकोणेशाः शुभाःत्रिषडायेशाः पापाः त्रिकोणं शुभस्थानं त्रिषडायाः न शुभा इत्यत्र विशेषः। अत्र लग्नमपि त्रिकोणत्वेन यथावसरं वक्ष्यमाणविचाराद्ग्राह्यम्।। ३।।

क्षेमङ्करी—सभी ग्रह त्रिकोण (९ व ५ भावों) के स्वामी होकर शुभफलदायक और त्रिषडाय (३,६ व ११ भावों) के स्वामी होकर अशुभ फलदायक होते हैं। अर्थात्— त्रिकोण स्थान शुभ और त्रिषडाय स्थान पाप फलद हैं, जो दोनों के स्वामी होते हैं, वे पाप फलद ही होते हैं।। ३।।

विमर्श—त्रिकोण भावों के स्वामी सभी ग्रह सदैव शुभफलदायक होते हैं, चाहे वह नैसर्गिक शुभ ग्रह हो, या पापग्रह। यह जरूर कहा जा सकता है कि शुभ ग्रह अतिशुभ और पापग्रह शुभद होते हैं। इसीप्रकार त्रिषडाय के स्वामी ग्रह पाप फलद होते हैं। शुभ ग्रह अशुभद और पापग्रह अतिअशुभद होते हैं। यहाँ निष्कर्ष यही निकलता है कि शुभ व पाप ग्रह यदि त्रिकोणेश हो तो शुभद और त्रिषडायेश हो, तो अशुभद ही होंगे। यहाँ इस बात की ओर ध्यान देना चाहिए कि यदि दो राशियों के स्वामी ग्रह त्रिषडायेश और त्रिकोणेश भी हो, तो भी वह पाप फलद ही माने जाते हैं।। ३।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ ग्रहाणां शुभत्वाशुभत्वेविशेषतामाह—

न दिशन्ति शुभ नृणां सौम्याः केन्द्राधिपा यदि।
क्रूराश्चेदशुभं ह्येते प्रबलाश्चोत्तरोत्तरम्।।४।।

अन्वयः—सौम्याः यदि केन्द्राधिपाः तदा नृणां शुभं न दिशन्ति, चेत् क्रूराः केन्द्राधिपाः, तदा अशुभं न दिशन्ति। हि एते उत्तरोत्तराः प्रबलाः भवन्ति।। ४।।

संस्कृत—अथ केन्द्रगुणान् वर्णयति न दिशन्तीति। सौम्याः शास्त्रान्तरप्रसिद्धाः शुभग्रहा यदि केन्द्राधिपा लग्न चतुर्थ दशम सप्तम स्थानपास्तदानृणां शुभफलं न दिशन्ति। यदि च पापाः केन्द्राधिपास्तदा अशुभं न दिशन्ति। एते शुभाः पापाश्चोत्तरोत्तरं यथा स्यात्तथा प्रबलाः। परमियमुक्तिः शास्त्रान्तरात्सर्वथा विरुद्धा यतः केन्द्रे लग्नचतुर्थसप्तमदशमानि चत्वारि स्थानानि तत्र लग्नाच्छरीरविचारः चतुर्थान्मातृसुखगृहबन्ध्वादीनां विचारः सप्तमात्कलत्र विचारः दशमाद्भाग्य पितृ व्यवसायादिकर्मविचारः। सर्वेषां भावानां शुभस्वामित्वेन शुभयोगाच्छुभदृष्ट्या चाशुभत्वं ग्रन्थान्तरेषु सर्वत्र प्रतिपादितम्। अत्रार्थे शुभस्वामीत्वेनाशुभत्वम् पाप स्वामित्वेन च शुभफलदत्वं तेनायमर्थो न समीचीनः अथप्रकारान्तरेणैतद्व्याख्यायते। केन्द्रे यानि चत्वारि स्थानानि तानि शरीरगृहस्त्रीराज्यमूलानि तेषां शुभस्वामित्वेन शरीरादीनामपि शोभनत्वम्। शरीरादीनां शोभनत्वे न पारलौकिकीचिन्तां मनुष्यः करोति। पाप स्वामित्वेन शरीरादीनां क्लेशबाहुल्ये सर्वे आस्तिका नास्तिका अपि सुमनसा हरिंस्मरन्ति अत आचार्येणैवमुक्तं यदि सौम्याः केन्द्राधिपास्तदा शरीरादिपदार्थानां शोभनत्वेन कारणेन शुभमर्थात्पारलौकिकं शुभं न दिशन्ति। यदि च पापाः केन्द्राधिपास्तदा शरीरादिनामशुभत्वेनाशुभमर्थात्पारलौकिकमशुभफलं न दिशन्तीति परमयमर्थो वेदान्तिनां सम्मतः न हौरीकाणाम्। अथ च वक्ष्यमाण ग्रन्थविचारतो वास्तविकोऽर्थः सौम्याः केन्द्राधिपाः शुभाः पापाः केन्द्राधिपाः पापफलदाः। तत्र यदि सौम्याः केन्द्राधिपाः त्रिषडायाधिपतित्वेनहेतुना नृणां शुभं न दिशन्ति तत्र क्रूराः केन्द्राऽधिपाः त्रिकोणेशत्वेन कारणेन शुभं दिशन्ति चेद्यदि सौम्या केन्द्राधिपाः त्रिकोणाधीशत्वेन शुभफलदास्तत्र क्रूराः त्रिषडायाधीशत्वेनाशुभफलदा एव। यथा कर्कट लग्ने सिंहलग्नेच चतुर्थदशमाधीशः। शुक्रः क्रमेण लाभतृतीयाधीशत्वेनपापफलदः तत्र दशम चतुर्थाधीशो भौमः पञ्चमनवमाधीशत्वेन शुभफलदः। मकरकुंभयोश्च दशमपञ्चम चतुर्थनवमाधीशः शुक्रः शुभफलदः। तत्र चतुर्थ दशमाधीशो भौमः लाभतृतीयाधीशत्वेन च पापफलद एवेति। परमस्यार्थस्य "कुजस्य कर्मनेतृत्वप्रत्युक्तेत्यादिकारिकाऽज्ञानान्नप्रतीतिः। तथैतेनभावस्य शुभसंज्ञाऽपि न जाता अतस्तावदस्यार्थः एवं यदि सौम्याः केन्द्राधिपाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शुभं न दिशन्ति तदाऽशुभमपि न दिशन्ति यदा च पापा: केन्द्राधिपा अशुभं न दिशन्ति तदा शुभमपि न दिशन्तीति। अनेन शुभस्वामित्वेन केन्द्रस्थानानां शुभत्वं पाप स्वामित्वेन चाशुभत्वं स्फुटमागतम्। अथैते उत्तरोत्तरक्रमेणप्रवला: लग्नाच्चतुर्थ: चतुर्थात्सप्तम: सप्तमाद्दशम: प्रवल इति।। ४।।

क्षेमङ्करी—शुभ ग्रह यदि केन्द्रेश हो, तो वह शुभ फल नहीं देते। पापग्रह यदि केन्द्रेश हो, तो अशुभ फल नहीं देते। इस प्रकार सभी उत्तरोत्तर क्रम से वली होते हैं। जैसे- पञ्चमेश से नवमेश बली, तृतीयेश से षष्ठेश, षष्ठेश से एकादशेश, और लग्नेश से चतुर्थेश, चतुर्थेश से सप्तमेश, सप्तमेश से दशमेश बली होते हैं। अत: बलवान् ग्रह के अनुसार फलकथन करना समीचीन है।। ४।।

विमर्श—उपरोक्त कथनों से यह निस्सरित हुआ कि यदि ग्रह (नैसर्गिक शुभ व पाप) त्रिकोणेश है, तो शुभ, त्रिषडायेश है, तो अशुभ और केन्द्रेश होने पर ग्रह स्वभावानुसार फल को स्थगित रखते हैं। यहाँ दो राश्यधिप यदि त्रिकोणेश के साथ षष्ठेश या अष्टेमेश भी हो, तो शुभ ग्रह की स्थिति में फल सम और अशुभ ग्रह की स्थिति में अशुभ फल समझना चाहिए। यदि शुभ ग्रह केन्द्र और त्रिषडाय के स्वामी हो, तो वह अशुभ फलद और क्रूर ग्रह केन्द्रेश और त्रिषडायेश होने पर प्राय: मध्यम फलद होता है। प्राय: त्रिषडायेश अथवा केन्द्रेश स्वगृही होकर शुभफलद होते हैं।

उपरोक्त मूल का अर्थ इस प्रकार भी विद्वानों ने किया है कि शुभ ग्रह केन्द्राधिपति शुभ तथा पापग्रह केन्द्राधिपति अशुभद होते हैं। परञ्च पाँच ग्रह दो दो राशियों के स्वामी होते हैं, इस कारण केन्द्रेश भी अन्य स्थानों के स्वामी हो सकते हैं। इस अवस्था में यदि शुभ ग्रह केन्द्रेश होकर त्रिषडायेश भी हो, तो शुभद नहीं होता। पापग्रह केन्द्रेश व त्रिकोणेश होकर शुभद होते हैं। जब शुभ ग्रह केन्द्रेश व त्रिकोणेश होने से शुभ कारक होता है, तो पापग्रह केन्द्रेश त्रिषडायेश होकर पापफलद होता है। यहाँ बुध, बृहस्पति और चन्द्र केन्द्रेश होने से सर्वदा शुभद तथा सूर्य केन्द्रेश होने से सर्वदा पापफलद होता है।। ४।।

अथात्र द्वितीय—द्वादशेशयोर्विशेषतामाह—

लग्नाद्व्ययद्वितीयेशौ परेषां साहचर्यत:।
स्थानान्तरानुगुण्येन भवत: फलदायकौ।। ५।।

अन्वय: —लग्नाद् व्ययद्वितीयेशौ परेषां साहचर्यत: स्थानान्तरानुगुण्येन फलदायकौ भवत:।। ५।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृत—लग्नाज्जन्मलग्नाद्व्ययद्वितीयाधीशौ ग्रहौ अन्येषां ग्रहाणां सम्बन्ध-वशात् तथा द्वितीयद्वादशातिरिक्तं यदन्यत्स्थानं तत्स्थानान्तरम् गुणमेवगुण्यम्। स्थानान्तरानुरूपं यद्गुणं तत्स्थानान्तरानुगुण्यं तेन च फलदायकौ भवत:। परमनेन द्वितीयद्वादशाधीशयोरेव सम्बन्ध वशात्फलप्रदत्वं नान्येषां तथा केन्द्रत्रिकोणपतय: सम्बन्धेन परस्परमित्यादिना सर्वेषां सम्बन्धवशात्फलप्रदत्वं वक्ष्यमाणम् तेनात्र महान्विरोध:। तथा द्वितीयद्वादशयोरेव ग्रहणे किं तात्पर्यम्। तेन प्रकारान्तरेणायं व्याख्यायते। ग्रहा: फलदायका भवन्ति कस्मात् परेषां साहचर्यत: तथा स्थानान्तरानुगुण्येन यथा लग्नाद्व्यय द्वितीयेशौ फलदायकौ भवत:। अत्र द्वितीयद्वादशग्रहणं भावनामनिर्देशार्थम्। तथा विशेषगुणबोधकार्थञ्च। अर्थाद्यद्यपि सर्वेग्रहा सम्बन्धवशात्फलानि दद्यु: तथापि द्वितीयद्वादशाधीशौ विशेषत: सम्बन्ध-वशात्फलदायकौ व्ययद्वितीयेशाविति वदताचार्येण ग्रन्थान्तरोक्तोत्क्रमक्रमगणनापि सूचिता। तथा स्थानद्वयाधिपतीनां स्थान विशेषत: फलनिश्चयत्वमपि प्रतिपादितम्। यथा समराशिस्था विषमस्थानानुरूपं विषम राशिस्था: समराश्यनुरूपं फलं प्रयच्छन्तीति। अथ च फल कथने विशेषत: स्थानान्तरानुगुण्यं पूज्यै: कल्पितं तेषां नामानि लक्षणानि च। स्थानान्तरानुगुण्यं षडिवधम्। गुणानुगुणसहायक-पोषकयुक्तिप्रकारका इति तेषांनामानि। विचाराश्रयी ग्रहो यस्मिन्भावे वर्तते तस्य गुण इति नाम। तत्सम्बन्धिग्रहो यस्मिनभावे तिष्ठेत् स चानुगुण:। विचाराश्रयीभूतो ग्रहो यद्भावाधिपति: स सहायक: तत्सम्बन्धिस्तु यद्राश्यधिप: स पोषक: विचाराश्रयीभूतग्रहराशीशो यस्मिन् राशौ भवेत्सयुक्ति: तत्सम्बन्धि ग्रहाधीशो यद्राशौ तिष्ठेत् स प्रकार इति। वराहमिहिरेणाप्येवमेवोक्तम्।

संज्ञाध्याये यस्य यद्द्रव्यमुक्तं,
कर्माजीवे यश्च यस्योपदिष्ट:।
भावस्थानालोकयोगोद्भवश्च,
तत्तत्सर्वं तस्य योज्यं दशायाम्।।
इति सम्बन्धन्त्वग्रे वक्ष्यति।।५।।

क्षेमङ्करी—लग्न से व्ययेश और धनेश (१२ व २ भावों के स्वामी) अपने दूसरे स्थान के अनुरूप और अन्य जिस प्रकार के ग्रह के साथ सम्बन्ध करता हो, तद्नुरूप फल देते हैं।।५।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विमर्श—उपरोक्त कथन से यह तो स्पष्ट ही है कि द्वादशेश और द्वितीयेश स्वभावानुसार शुभाशुभ फल नहीं देते। जिस स्थान या जिस प्रकार के ग्रह के साथ रहते हैं अथवा उनकी अपनी दूसरी राशि जैसी शुभाशुभ भाव में हो, उसी के अनुसार शुभ या अशुभ फल करते हैं। अर्थात् वे दोनों जिस ग्रह के साथ रहते हैं, वह ग्रह अपने अनुसार फल देता है। यदि बहुत ग्रह साथ हो, तो वलीग्रह अपने अनुसार फल को देता है। यदि कोई ग्रह साथ न हो, तो वे अपने दूसरे स्थान के स्वामी होने का शुभाशुभ फल को करते हैं। यदि सूर्य या चन्द्र ग्रह विहीन द्वितीयेश या द्वादशेश हो, तो अपने उसी भाव का फल करता है, जहाँ वह बैठा होता है। यदि सूर्य व चन्द्र स्वगृही होकर द्वितीय या द्वादश में बैठा हो, अन्य किसी का योग न हो, तो अपने अनुसार फल को करते हैं।।५।।

अथाष्टमेशयोर्विशेषतामाह—

भाग्यव्ययाधिपत्येन रन्ध्रेशो न शुभप्रदः।
स एव शुभ संधाता लग्नाधीशोपि चेत्स्वयम्।।६।।

अन्वयः—रन्ध्रेशः भाग्यव्ययाधिपत्येन शुभप्रदः न भवति। चेत् सः एव स्वयं लग्नाधीशः अपि तर्हि शुभसन्धाता भवति।।६।।

संस्कृत—भाग्यव्ययेति— रन्ध्रेशोऽष्टमभवनाधीशो ग्रहः

भाग्यव्ययाधिपत्येन कारणेन न शुभप्रदः। भाग्यञ्च व्ययञ्चेति भाग्यव्ययं तयोराधिपत्येन स्वामित्वेनेति—परं व्ययाधिपत्यं रन्ध्रेशस्य कथं चिदपि न स्यादित्यनेनायमर्थो समीचीनः। भाग्यस्य व्ययम् भाग्यव्ययं तदधिपत्वेनेति विग्रहे शुभभावाधिपा अपि पापफलप्रदाः स्युः यथा भाग्येशो न शुभः कर्मव्ययाधिपत्येन लग्नेशो न शुभः धनव्ययाधिपत्येन इत्यादि तेनायमर्थो न साधुः। तेन रन्ध्रेशश्छिद्राधिपो ग्रहः भाग्यव्ययाधिपत्येन भाग्यनाश कर्तृत्वेन हेतुना यथा रन्ध्रेशश्छिद्रान्वेषी दुर्जनः भाग्य व्ययाधिपत्वेन परस्य निष्प्रयोजनं सुकार्यनाशकर्तृत्वेन हेतुना न शुभस्तथैव न शुभप्रदः। अथ च स एव रन्ध्रेशः शुभसन्धाता शुभकर्ता स्यात् यदा स्वयं लग्नाधीशोपि चेत्तदा। अत्र लग्नाधीशशब्देनैव कार्यनिर्वाहे अपि चेत्स्वयमित्यनेन कश्चिद्विशेषार्थः संभाव्यते। अत्र लग्ने त्रिकोणे केन्द्रे च परिगणितं त्रिकोणस्य शुभत्वं स्पष्टं प्रतिपादितमेव तेन लग्नाधीशोऽपि चेदित्यनेन यदि रन्ध्राधीशस्त्रिकोणाधीशो भवेत्तदा शुभकर्ता अन्यथा स्वयमित्युक्ता अष्टमस्थाने भवेत्तदा शुभकर्ता स्यादिति— छिद्रान्वेषी जनवर्णनम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बहुनिष्कपटद्रोही बहुधान्योपघातक:।
रन्ध्रान्वेषी च सर्वत्र दूषको मूषको यथा।।

अन्यच्च—

प्राक्पादयो: पतति खादति पृष्ठमासं
कर्णेकलं किमपि रौति शनैर्विचित्रम्।
छिद्रं निरूप्यसहसा प्रविशत्यशंकं
सर्वं खलस्यचरितं मशक: करोति,।।
इति भाव गुणवर्णनम्।। ६।।

क्षेमङ्करी—भाग्यभाव का जो व्ययस्थान उस व्ययस्थान के स्वामी होने से अष्टमेश शुभफलद नहीं होता है एवं यदि वह स्वयं लग्नेश भी हो, तो शुभफलद होता है।। ६।।

विमर्श—यहाँ 'लग्नाधिशोऽपि' (लग्नेश भी हो) इस का तात्पर्य स्पष्ट है कि त्रिकोण (१,५,९) शुभ भाव हैं, वहाँ 'प्रवलाश्चोत्तरोत्तरम्' के अनुसार लग्न की तुलना में ५ व ९ भाव अधिकतर शुभ हैं। वहाँ रन्ध्रेश यदि लग्न का स्वामी भी हो, तो शुभफलद होता है, तो यदि वह पश्चमेश या नवमेश भी हो, तो निश्चय शुभद होगा। अत: स्पष्ट होता है कि अशुभकारी अष्टमेश, जब शुभकारी त्रिकोण का स्वामी होगा, तो वह शुभफलद हो जाता है। यह भी सिद्ध होता है कि यदि अष्टमेश त्रिडायेश भी हो, तो वह और अशुभद हो जाएगा। लेकिन यदि वह अष्टमेश होने के साथ किसी अन्य स्थान का स्वामी नहीं है, तो सामान्य अशुभकारक होगा। प्रतीत होता है, इसी कारण सूर्य चन्द्र में आगे अष्टमेश होने के दोष प्रथम नहीं कहे गए हैं। यहाँ यह भी स्पष्ट है कि प्रत्येक भाव का व्ययभाव उस उस भाव के लिए अशुभद होता है। इन समस्त व्ययेशों में भाग्य का व्ययेश होना अधिकतर अशुभद हैं। क्योंकि जहाँ अष्टमेश त्रिकस्थान का स्वामी होकर अशुभद है, वही वह भाग्यहानि करने के कारण परम अशुभद माना जाएगा। वहीं पर भाग्य भाव त्रिकोण (१,५,९) भावों में सबसे अधिक शुभ माना जाता है। अत: अधिक अशुभतर भाव का स्वामी भी अधिक अशुभतर ही माना जाना चाहिए। प्राय: अष्टमेश होकर शुभभावेश होने से अशुभता कम हो जाती है। न कि समाप्त होती है। अत: अष्टमेश, यदि लग्नेश भी हो, तो शुभाशुभ मिश्रित फल ही मिलेगा। यहाँ यह भी स्पष्ट है कि अन्य स्थानों या भावों के व्ययेश की तुलना में भाग्य भाव के व्ययेश में सकारात्मकता का सर्वदा अभाव व्यक्त होता है, जब कि अन्य स्थान के व्ययेश सकारात्मकता युक्त होने से उसकी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तुलना में न्यूनतम अशुभता के कारण शुभ ही माना जाता है। सकारात्मकता से तात्पर्य यह है कि रचनात्मक, विकासात्मक यदि व्यय हो (भले व्यय होना अशुभ है, फिरभी), तो उसे सार्थक ही कहा जाएगा, भाग्यातिरिक्त भावों के व्ययेश में यही लागू होता है।। ६।।

अथ भावगुण कथनानन्तरं ग्रहगुणान्वर्णयति—

केन्द्राधिपत्यदोषस्तु बलवान्गुरुशुक्रयोः।
मारकत्वेऽपि च तयोर्मारकस्थानसंस्थितिः।। ७।।

बुधस्तदनु चन्द्रोऽपि भवेत्तदनु तद्विधः।
न रन्ध्रेशत्वदोषस्तु सूर्याचन्द्रमसोर्भवेत्।। ८।।

अन्वयः—गुरुशुक्रयोः केन्द्राधिपत्यदोषः बलवान् अपि च तयोः माकस्थानसंस्थितिः मारकत्वे बलवती भवति।। ७।।

तद्नु बुधः तद्विधः तदनु चन्द्रः अपि तद् विधः भवेत्। सूर्याचन्द्रमसोः तु रन्ध्रेशत्व दोषः न भवेत्।। ८।।

संस्कृत—गुरुशुक्रयोः देवदैत्येज्ययोः केन्द्राधिपत्यदोषो बलवान् तथा तयोर्मारकस्थानसंस्थितिर्मारकत्वे विषये बलवती। अर्थादस्मिन्ग्रन्थे त्रिकोणाधीशस्यैव शुभत्वं प्रतिपादितम्। केन्द्राधीशस्य गुरोः त्रिकोणेशत्वस्या संभवात् शुक्रस्य तु शुभस्थानाधिपतित्वापेक्षयाऽशुभस्थानाधिपतित्वस्यैव प्रायः संभवात् तयोः केन्द्राधिपत्य-प्रयुक्तो यो दोषः सबलवान् परन्त्वत्र ग्रन्थेषु गुरुशुक्रयोः पूर्वं केन्द्र स्थानाधिपत्वे दोषकथनाभावादत्र केन्द्राधिपतित्व दोषं वर्णयति तयोः गुरुशुक्रयोः मारके मारकस्थाने वक्ष्यमाणप्रकारेण सप्तमे स्थानसंस्थितिः स्थानस्य राशेः संस्थितिश्चेत्तदायमेव केन्द्राधिपत्यदोषो मारकत्वेपि च बलवान् भवेत् एतदृक्तं भवति यदि गुरुशुक्रौ मारकाधीशौ स्यातां तदा प्रवलमारकावपिभवेतामिति। यदि गुरुःसप्तमेशश्चेत्तदा चतुर्थदशमान्यतरस्थानाधिपतित्वेन त्रिकोणाधिपतित्वाभावात् स्थानान्तरानुगुण्येन शुभत्वासंभवः। शुक्रो यदा सप्तमेशश्चेत्तदा द्वादश द्वितीयान्यतरस्थानपतित्वेन मारकफलस्यैव प्रावल्यम्। तेन तयोः विशेषेण शुभदत्वात् मारकत्वेपि प्रावल्यं स्यादेवेति। गुरुशुक्रापेक्षया बुधस्याल्पशुभदत्वात्ततोऽपि चन्द्रस्याल्पशुभदत्वात्क्रमशः बुधचन्द्रयोरल्पमल्पमारकेशत्वमिति। अथ च सूर्याचन्द्रमसो रविचन्द्रयो रन्ध्रेशत्व दोषः न भवेत् परन्तु रविचन्द्रयोर्दशायां बाहूनां भाग्यहानिमारकक्लेशादिदर्शनात् पक्षोऽ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नादरणीय: तेन रविचन्द्रयोरष्टमेशत्वप्रयुक्तो दोषो न, यदि भवेदर्थादष्टमे भवेत्तदेति भाव: पूर्वमन्येषां भावाधिपतीनां त्रिकोणेशत्ववशाच्छुभत्वमुक्तं परं रविशशिनो: स्थानान्तराभावादष्टमेशत्वावस्थायामष्टमस्थानस्थितिवशादेवतयो: शुभत्वं स्यादिति सूचितमिति।। ७—८।।

क्षेमङ्करी—बृहस्पति और शुक्र का केन्द्राधिपतित्व दोष बलवान् होता है। यदि वे केन्द्रेश होकर मारक (सप्तमभाव) स्थान में स्थित हों, तो वे अन्य की अपेक्षा अधिक मारक होते हैं। इस प्रकार बृहस्पति और शुक्र सप्तमेश होने से प्रवल मारकेश होते हैं। और इन से अल्प बुध और बुध से अल्प चन्द्रमा मारकेश होते है, यदि वे सप्तमेश हैं। सूर्य व चन्द्रमा अष्टम स्थान में भी यदि हों, तो उनको अष्टमेश होने का दोष नहीं होता क्योंकि एक राशि के स्वामी होने के कारण अष्टमेश होकर वे त्रिकोणेश नहीं हो सकते।। ७-८।।

विमर्श—गुरु व शुक्र केन्द्र के स्वामी भी हो और मारक भाव में स्थित भी हो, तो वे प्रबल दोष कारक होते हैं। केन्द्र के दो भावों के स्वामी होकर गुरु प्राय: परम दोष कारक होते हैं, जैसा कन्या, मिथुन, धनु, मीन लग्न में होता है। वही उसका सप्तम स्थान में स्थिति प्रवल दोषावह है। इस प्रकार देखते है कि गुरु की दो राशियाँ केन्द्र में पड़ती हैं, परन्तु शुक्र की दो राशियाँ केन्द्र में एक साथ सम्भव नहीं। फिर शुक्र को गुरु के साथ क्यों कहा गया है। शुक्र की एक राशि अधिकतर लग्न से केन्द्र में पड़ती है। उसकी दूसरी राशि प्राय: २,६, ८,१२ या अन्य भावों में पड़ती है, इसीलिए गुरु के साथ शुक्र को महत्त्व दी गई है। वहीं बुध की दो राशियाँ केन्द्र में पड़ती है, जैसे- मिथुन, कन्या, धनु और मीन लग्न। बुध केन्द्रेश होकर मारक भाव में पड़ जाय, तो वह मारक होगा। फिर भी गुरु व शुक्र की अपेक्षा उसमें मारक भाव कम होगा। इसी प्रकार चन्द्र की एक राशि होती है। वह केन्द्रेश होकर भी चतुर्थ व दशम में न्यूनतम अशुभ होगा, वहीं लग्न सप्तम में होकर अधिक अशुभ होगा। वह भी सप्तम में कर्क राशि का होकर मारक होता है। फिर भी वह बुध की अपेक्षा अल्प अशुभ होगा।

यहाँ यह ध्यानार्ह है कि गुरु, शुक्र, बुध व चन्द्र यदि केन्द्रों (१,४,७ व १०) में किसी अन्य राशियों में स्थित हों, तो उन्हें मारकत्व की शक्ति नहीं मिलती है। कुलमिलाकर यहाँ निष्कर्ष यह है कि केन्द्रेश होकर केन्द्रस्थित होने पर गुरु व शुक्र को उसके बाद बुध और फिर चन्द्रमा को मारकत्व प्राप्त होता है। केन्द्रों में भी सप्तम पर विशेष ध्यान देना पड़ता है।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यहाँ इस बात पर भी ध्यान देना समीचीन है कि भाग्य स्थान के व्ययेश होने से अष्टमेश को अशुभ माना गया, उसका अपवाद यहाँ यह कहा गया कि सभी अष्टमेश अशुभ होते हैं, लेकिन सूर्य व चन्द्र उससे मुक्त कर दिये गए। अर्थात् सूर्य व चन्द्र अष्टमेश भी हों, तो दोषावह नहीं हैं। लेकिन मेरा मानना है कि दोष तो होगा, लेकिन अन्य की अपेक्षा न्यूनतम होगा।। ७-८।।

अथ पापग्रहाणां केन्द्राधिपत्वे विशेषतामाह—

कुजस्य कर्मनेतृत्वप्रयुक्ता शुभकारिता।
त्रिकोणस्यापि नेतृत्वे न कर्मेशत्वमात्रतः।। ९ ।।

अन्वयः—कुजस्य त्रिकोणस्य अपि नेतृत्वे कर्मनेतृत्वे प्रयुक्ता शुभकारिता भवति कर्मेशत्वमात्रतः शुभकारिता न भवति ।। ९।।

संस्कृत—अथ केवलानां प्रसिद्धानां पापानां गुणान्कथयति। कुजस्य भौमस्य दशमाधीशत्वप्रयुक्ता या शुभकारिता सा त्रिकोणस्यापि स्वामित्वे भवति केवलं दशमेशत्वेनैव न भवतीति। परं पूर्व भौमस्यशुभफलप्रदत्वकथनाभावात् पापग्रहाणां सर्वेषां शुभत्वप्रतिपादनादयमर्थो न साधुः। अत्र तु न दिशन्तीति पूर्वश्लोकोक्तं शुभफलप्रदत्वं विशिनष्टि। कुजस्यार्थात् पापस्य कुत्सितं जन्म जायते स्वतुङ्गगैः क्रूरैः क्रूरमतिर्महीपतिरित्यादिना येनाऽसौकुजः पापः तस्य कर्मनेतृत्वे दशमचतुर्थस्थानाधीशत्वे या शुभकारिता सा त्रिकोणस्यापि स्वामित्वे भवति दशमेशत्वमात्रतोऽर्थात् केन्द्रेशत्वेनैव शुभकारिता न भवतीति।। ९।।

क्षेमङ्करी—कुज (निसर्गतः पापी ग्रह) के केन्द्राधिपति होने से सामान्यरूप से जो शुभ फल दातृत्व (अर्थात् शुभफलद) कहा गया है, वह उसके त्रिकोणेश हुए विना सम्भव नहीं है। अर्थात् पापग्रह यदि केन्द्रत्रिकोणधिपति दोनों हो, तभी शुभफलप्रद होता है।। ९।।

विमर्श—पाप ग्रह के केन्द्रेश होने से, जो शुभप्रदता बतायी गई है, वस्तुतः उसके त्रिकोणेश होने पर ही समझना चाहिए। पापी ग्रह के केन्द्रेश होने मात्र से वह पापी ग्रह पापफल को स्थगित करता है। लेकिन उसका पापत्व तभी पूर्णतः नष्ट होता है, जब वह त्रिकोणेश भी हो जाता है। जिससे पापी ग्रह में शुभत्व का विवेक जागृत हो जाता है। इस प्रकार इसमें इस बात की पुष्टि हुई कि केन्द्रेश होकर यदि पापी ग्रह त्रिषडायेश भी हो जाय, तो वह प्रबल पाप कारक हो जाएगा।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इस श्लोक में कुज शब्द से पापीग्रह और कर्म शब्द का अर्थ यहाँ केन्द्र किया जाता है। उपरोक्त सूत्र के अनुसार कर्क लग्न में मंगल पंचमेश व दशमेश होगा। सिंह लग्न में चतुर्थेश और नवमेश होकर राजयोगकारक है। अन्य ग्रह में शनि वृष लग्न में नवमेश और दशमेश और तुला लग्न में चतुर्थेश और पञ्चमेश होगा। यहाँ यह बात परोक्ष रूप से स्पष्ट हो जाता है कि उपरोक्त के विपरीत पापी केन्द्रेश होने के साथ यदि त्रिषडायेश (३,६,११ भाव के स्वामी) भी होगा, तो अशुभकारिता में ही वृद्धि होगी। जैसे मेष लग्न में शनि दशमेश और एकादेश होता है। सिंह लग्न में षष्ठेश व सप्तमेश कन्या लग्न में पञ्चमेश व षष्ठेश होता है। वृश्चिक लग्न में तृतीयेश और चतुर्थेश होकर अशुभदत्व को ही दर्शाता है।। ९।।

अथ राहुकेत्वोः शुभाशुभदत्वमाह—

यद्यद्भावगतौ वाऽपि यद्यद्भावेशसंयुतौ।
तत्तत्फलानि प्रबलौ प्रदिशेतां तमोग्रहौ।।१०।।

अन्वयः —तमो ग्रहौ यद्यद्भावगतौ यद्यद्भावेश संयुतौ तत्तत्फलानि प्रवलौ (सन्तौ) प्रदिशेताम्।।१०।।

संस्कृत—प्रबलौ तमोग्रहौ राहुकेतू प्रकाशाभावात्तयोः प्राबल्यम् यद्यद्भावेशसंयुतौ सन्तौ यद्यद्भावगतौ स्तः तत्तत्फलानि प्रदिशेतामिति। अथ प्रागुक्तस्य स्थानान्तरानुगुण्यस्य कतिपयभेदा अत्र लिख्यन्ते।

दीप्तः स्वस्थःप्रमुदितः शान्तो दीनोऽतिदुःखितः।
विकलश्च खलः कोपी नवधा खेचरो भवेत्।।
उच्चस्थः खेचरो दीप्तः स्वस्थः स्वर्क्षेऽधिमित्रभे।
मुदितो मित्रभे शान्तेः समभे दीन उच्यते।।
शत्रुभे दुःखितोऽतीव विकलः पापसंयुतः।
खलः खलगृहे ज्ञेयः कोपी स्यादर्कसंयुतः।।
पृथक् पृथक् फलं तेषां दशापाके विशेषतः।
उत्तमाद्यनुरोधेन फलं पाके वदन्ति हि।।
पाके प्रदीप्तस्य धराधिपत्यमुत्साहशौर्ये धनवाहने च।
स्त्रीपुत्रलाभं शुभवन्धुपूज्यं क्षितीश्वरान्मानमुपैति विन्द्यात्।।
स्वस्थस्य खेटस्य दशाविपाके स्वस्थो नृपादत्रधनादि सौख्यम्।
विद्या यज्ञे प्रीतिमहत्वमाराद्दारार्थ भूम्यादिजधर्ममेति।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मुदान्वितस्यापिदशाविपाके वस्त्रादिभूगन्धसुतार्थधैर्यम्।
पुराणधर्मश्रवणादिलाभंवस्त्रादियानाम्बर भूषणाप्तिम्।।
दशाविपाके सुखधर्ममेति शान्तस्यभूपुत्रकलत्रयानम्।
विद्याविनोदान्वितधर्मशास्त्रं वह्वयर्थदेशाधिपपुज्यताश्च।।
स्थानच्युतिर्वन्धुविरोधता च दीनस्यखेटस्यदशाविपाके।
जीवत्यसौ कुत्सितहीन वृत्या त्यक्तो जनै रोगनिपीड़ितःस्यात्।।
दुःखार्दितस्यापि दशाविपाके नानाविधं दुःखमुपैतिनित्यम्।
विदेशगो बन्धुजनैर्विहीन श्चौराग्निभूपैर्भयमातनोति।।
वैकल्यखेटस्य दशाविपाके वैकल्यमायाति मनो विकारम्।
मित्रादिकानां मरणं विशेषात्स्त्रीपुत्रयानाम्बरचौरपीडाम्।।
दशाविपाके कलहं वियोगं खलस्यखेटस्यपितुर्वियोगम्।
शत्रोर्जनानां धनभूमिनाशमुपैतिनित्यं स्वजनैश्च निन्दाम्।।
कोपान्वितस्यापि दशाविपाके पापाः समायान्ति बहुप्रकारैः।
विद्याधनस्त्रीसुतबन्धुनाशं पुत्रादिकृच्छ्रं त्वथ नेत्ररोगम्।।

इत्युडुदायप्रदीपे संज्ञाध्यायोः द्वितीयः।।१०।।

क्षेमङ्करी—राहु और केतु जिस भाव में, जिस भावेश के साथ होकर स्थित हों उनके फलों को देते हैं। इससे यह भी समझना चाहिए कि अकेले राहु व केतु जिस भाव में होते हैं, उस भाव का अनिष्ट फल ही करते हैं।।१०।।

विमर्श—राहु व केतु को छाया ग्रह माना गया है, आकाश में इनका अपना स्वतंत्र स्वरूप नहीं है। अतः वे अपने साथी ग्रहों के अनुरूप फल प्रदान करते हैं। जिस भाव में ये बैठते हैं, उस भाव के स्वामी ग्रह की फलप्रदता में भी वृद्धि हो जाती है। वे यदि केन्द्र या त्रिकोण में केन्द्रेश या त्रिकोणेश के साथ युति करें तो वे योग कारक भी हो जाते हैं। इस प्रकार राहु और केतु कारक ग्रह के साथ परमकारक और मारक के साथ मरम मारक का प्रभाव प्रदर्शित करते हैं। अतः राहु व केतु स्थान, युति, ग्रह दृष्टि के अनुसार उस ग्रह के गुणधर्मानुसार शुभाशुभ फलदेते हैं।।१०।।

इति दोरमा (सहरसा) निवासिना श्री सूर्यनारायणात्मजेन मैथिलेन
डा. सुरकान्त झेत्यनेनुडुदायप्रदीपे सान्वय—क्षेमङ्करीहिन्दी—विमर्शेषु
संज्ञाध्यायो द्वितीयः।।

❖ ❖ ❖

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथयोगाऽध्याय: —३

अथात्र सामान्य योगानाह—

केन्द्रत्रिकोण पतय: सम्बन्धेन परस्परम्।
इतरैरप्रसक्ताश्चेद्विशेष फलदायका:।।१।।

अन्वय: —केन्द्र त्रिकोणपतय: चेत् इतरै: अप्रसक्ता:, तर्हि परस्परं सम्वन्धेन विशेष फलदायका: भवन्ति।। १।।

संस्कृत—केन्द्र त्रिकोण पतय इति केन्द्रपतयश्च त्रिकोणपतयश्च तत्र केन्द्राणि १,४,७,१० स्थानानि तत्पतयश्च त्रिंकोणानि नवमपञ्चमस्थाने तत्पतयश्चेति केन्द्रत्रिकोणपतय: चेद्यदि इतरै: केन्द्रकोणयोरतिरिक्त स्थानस्वामिभि र्त्रिषडायेशादिभिरप्रसक्ता: सम्बन्धरहिता: तर्हि परस्परं मिथ: सम्बन्धेन संयोगेन विशेषफलदायका: भवन्ति। अर्थात् सम्बन्ध सहिता: तर्हि सामान्य शुभफलदायका इति कथितमत्रास्ति। एवं तत्र त्रिकोणेशा: शुभफलकारका: त्रिषडायेशाश्च पापफलदा: भवन्ति। केन्द्राधिपतय: शुभग्रहा: शुभदा:, पापग्रहा: अशुभदा इति पूर्वोक्ता:। चेत् शुभग्रहा: केन्द्राधिपतित्वेन त्रिषडायाधिपतित्वेन त्वशुभफलकारका: भवन्ति, परञ्च पापा: तदनुरूपत्वे सति केन्द्रत्रिकोणाधिपतित्वेन शुभफलदा: भवन्ति। पुनश्च यदि शुभग्रहा: केन्द्राधिपतित्वेन त्रिकोणेशाधिपतित्वेन तु शुभफलदा: तदा तदनुरूपत्वे सति पापा: केन्द्रेशत्वेन त्रिषडायेशत्वेन तु पापफलदा: भवन्ति। द्वितीयद्वादशावीशौ त्रिकोणपतित्वेन सम्बन्धत्वेन तु शुभौ, त्रिषडायेशत्वेन सम्बन्धत्वेन त्वशुभौ। केन्द्राधिपति: शुभग्रहसंयोगेन शुभद: पापग्रहसंयोगेनाशुभ:, तत्राष्टमेशेन सम्बन्धेनाप्यशुभ:। अत: सूर्याचन्द्रमसौ हित्वा सर्वेग्रहा: द्वयो: राशयो: स्वामिनो भवन्ति। तस्मात्कारणाच्च द्वितीयद्वादशेशौ त्रिकोणेशत्वेन शुभौ, त्रिषडायेशत्वेनाशुभौ। शुभग्रहस्य केन्द्रेशत्वेन शुभद:, पापग्रहस्य केन्द्रेशत्वेनाशुभदश्च भवन्ति। अतएव तत्रत्य केन्द्रकोणयो: मिथ: सम्बन्धेन, त्रिषडायेशस्य सम्बन्धाभावाच्च विशेषशुभफलकारका: ग्रहा: त्रिषडायेशस्य सम्बन्धत्वेन मिश्रितफलदा: भवन्ति।।१।।

क्षेमङ्करी—केन्द्र और त्रिकोण के स्वामियों का परस्पर सम्बन्ध होने से विशिष्ट शुभ फल कहा गया है। वहीं यदि वे त्रिषडायेश से सम्बन्ध करें, तो मिश्रित फल देते हैं। अर्थात् कभी शुभ और कभी अशुभफल करते हैं।।१।।

विमर्श—यह तो स्पष्ट ही है कि केन्द्र और त्रिकोण के स्वामी परस्पर यदि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्बन्ध करते हैं या योगकारी हों, तो अत्यन्त शुभ फल करते हैं। लेकिन ऐसा तभी होता है जब वे त्रिषडायेश (३,६,११ के स्वामी) या अष्टमेश से सम्बन्ध नहीं रखते हों। यदि सम्बन्ध रखते हों, तो शुभफल में कमी होता है या मिश्रित फल करते हैं, यही बात परम्परा मान्य है, कई आचार्यों ने इस अर्थ को स्वीकारा है। क्योंकि अगले श्लोक में 'दोषयुक्तावपि' कहा गया है। इस सम्बन्ध में ध्यान रखना चाहिए कि उक्तयोग यदि केन्द्र व त्रिकोण में ही बने, तो उत्तम है। या लग्न, द्वितीय, द्वादश स्थान में बने तोभी अच्छा, त्रिषडाय में शुभराशि हो उसमें बने, तो मध्यम और अशुभराशि में या अष्टम स्थान में बने तो निकृष्ट फलदायी होता है।

उपरोक्त केन्द्र और त्रिकोण की योगकारकत्व, भावेश ग्रहों के अधोलिखित चार प्रकार के सम्बन्ध पर निर्भर करती है।

(१) **स्थान सम्बन्ध**— जिन योगकारक ग्रहों में सम्बन्ध देखना हो, वे दोनों ग्रह परस्पर एक दूसरे के गृह में हो, अर्थात् पहला दूसरे के और दूसरा पहले के गृह में हों, तो स्थान सम्बन्ध होता है। जैसे- मेष या वृश्चिक राशि में सूर्य और सिंह राशि का मंगल स्थित हो, तो सूर्य और मंगल का परस्पर स्थान सम्बन्ध होता है।

(२) **दृष्टिसम्बन्ध**— जब दो ग्रह परस्पर एक-दूसरे को देखें अर्थात् दोनों की सम सप्तक दृष्टि हो। जैसे— सूर्य कर्क में और मंगल मकर में हों या मेष का मंगल तुला (नीच) में सूर्य।

(३) **स्थान-दृष्टि सम्बन्ध**— एक दूसरे के स्थान में हो और दूसरा उसको देखता हो। इसे साहधर्म्य सम्बन्ध भी कहा जाता है। जैसे— मेष के सूर्य को मंगल अपनी किसी पूर्णदृष्टि से देखें।

(४) **युति सम्बन्ध**— किसी एक राशि में ही दोनों योगकर्त्ता ग्रह हो अर्थात् दोनों एक स्थान में हो। जैसे— मीन में सूर्य के साथ मंगल हो।

ये चारों सम्बन्ध क्रम से प्रबल होते हैं। जैसे पहला से दूसरा, दूसरा से तीसरा और तीसरा से चौथा अर्थात् चौथा युति सम्बन्ध को सबसे प्रबल माना गया है।।१।।

अथात्र केन्द्रत्रिकोणेशयोर्दोषयुक्तावपि योगानाह—

केन्द्रत्रिकोणनेतारौ दोषयुक्तावपि स्वयं।
सम्बन्धमात्राद् बलिनौ भवेतां योगकारकौ।। २ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्वय: —केन्द्रत्रिकोणनेतारौ स्वयं दोषयुक्तौ अपि सम्बन्धमात्राद् बलिनौ सन्तौ योगकारकौ भवेताम्।। २।।

संस्कृत—बलिनौ केन्द्रत्रिकोणनेतारौ अर्थात् बलिनौ दशमेश नवमेशौ, यदि तौ स्वयं त्रिषडायाधीशावपि भवत: तदाऽपि यदि अनयो:सम्बन्धो भवति तथा च तौ योगकारकौ भवत:। अत्र विचारार्थं लग्नस्यैको गुण: चतुर्थस्य द्वौ सप्तमस्यत्रय: दशमस्य चत्वार: पञ्चमस्य द्वौ नवमस्य चत्वार:। तृतीयस्यैक: षष्ठस्यद्वौ एकादशस्यत्रयोगुणा: पूर्वै: कल्पिता:। तत्र लग्नेशपञ्चमेशयो: सम्बन्धवशाद्भाग्ययोगस्य त्रयोगुणा: सम्पन्ना:। तत्र तृतीयेशसम्बन्धाद्वा षष्ठेशसम्बन्धाद्भाग्ययोगोवशिष्यते। परं लाभेशस्य वा तृतीयषष्ठाधीशयोर्वा सम्बन्धान्न भाग्ययोग: तुल्यशुभपापगुणत्वात्। चतुर्थपञ्चमाधीशयोस्सम्बन्धे तद्वत्तृतीयलाभाधीशयो: सम्बन्धवशाद्भाग्ययोगाभाव:। सप्तमेशपञ्चमेशसम्बन्धे षष्ठलाभाधीशयो: सम्बन्धाद्भाग्ययोगाभाव: दशमेश चतुर्थेशयो: सम्बन्धे तृतीयष्ठैकादशाधिपानां सम्बन्धवशाद्भाग्ययोगाभाव:। तथैव लग्नेशनवमेशयो: सम्बन्धे षष्ठेश लाभेशयो: सम्बन्धाद्भाग्ययोगाभाव: नवमेशचतुर्थेशयो: सम्बन्धे तृतीयषष्ठलाभेशानां सम्बन्धवशाद्भाग्ययोगाभाव:। परं सप्तमनवमेशयो: सम्बन्धे त्रयाणां पापानां सम्बन्धेनैकोगुणोवशिष्यते। तथा दशमेशनवमेशयो: सम्बन्धे त्रयाणामपि सम्बन्धसत्वे द्वौगुणौ भाग्ययोगस्यावशिष्यते। तेन दशमनवमाधीशयोरेव सम्बन्ध: सर्वसम्बन्धाद्बलीय: अमुमेवार्थमत्र वर्णयति। वलिनौ केन्द्रत्रिकोणनेतारौ दशमनवमाधीशौ स्वयं दोषयुक्तावपि चेत्स्तस्तदापि सम्बन्धवशाद्योगकारकौ तौ भवेतां सामान्यरूपेणैवेतिशेष:।। २।।

क्षेमङ्करी—केन्द्रेश व त्रिकोणेश दोनों अथवा दोनों में से एक अपने किसी दोष से युक्त हो तो भी केवल परस्पर सम्बन्ध होने से बलवान् होते हैं और योग कारक होते हैं। केन्द्रेश शुभग्रह हो, तो स्वयं दोषी होता है और नीच, अस्त आदि होना भी स्वयं उनके दोष हैं।। २।।

विमर्श—श्लोकोक्त 'दोषयुक्तावपि' शब्द का विभिन्न आचार्यों ने विभिन्नार्थ किया है। किसी ने केन्द्रत्रिकोण के स्वामियों का अपने दोष से दूषित होने अर्थात् केन्द्रेश होने का दोष, अस्त रहना या नीच का होना आदि को माना है। किसी ने त्रिषडायेश भी होना स्वयं का दोष माना है। कुछ भी हो उपरोक्त दोष होने में ग्रह के योगकारी सम्बन्ध होने पर वह बली ही माना जाना चाहिए। चुँकि पूर्वश्लोक 'केन्द्रत्रिकोण पतय: सम्बन्धेने' त्यादि में केन्द्र व त्रिकोण से भिन्न भाव के स्वामी होने पर या सम्बन्ध होने पर योगफल में कमी होने की बात कही जा चुकी है। फिर 'दोष

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

युक्तावपि' का अर्थ त्रिषडायेश होने से लगाना ग्रन्थकर्त्ता में पुनरूक्त या ग्रन्थकर्त्ता के कथन में विरोधाभास का होना हो जाएगा। लेकिन ग्रह के स्वयं का दोष केन्द्रेश होना, नीच होना, शत्रु राशि में रहना या अस्त रहना आदि हो सकता है, और जिससे आर्चाय ग्रन्थ कर्त्ता के कथन की पुष्टि भी हो जाती है।। २।।

अथ ग्राह्यसम्बन्धानाह—

निवसेतां व्यत्ययेन तावुभौ धर्मकर्मणोः।
एकत्रान्यतरोवापि वशेच्चेद्योगकारकौ।। ३।।

अन्वयः—तौ उभौ व्यत्ययेन धर्मकर्मणोः निवसेतां (तदा योगो भवति)। वा एकत्र निवसेतां (तदापि योगो भवति) (अपिवा एक एव निजस्थाने निवसेत् तदा) योगकारकौ भवतः।। ३।।

संस्कृत—तावुभाविति नवमदशमाधीशौ व्यत्ययेन निवसेतां नवमेशो दशमे दशमेशश्च नवमे तदैकोयोगः एकत्र निवसेतां यत्र कुत्राप्येकराशौ भवेतां तदा द्वितीयो योगः अन्यतरो वापि व्यत्ययेन वसेच्चेद्दशमेशो नवमे वा नवमेशो दशमे तदा योगकारकौ भवेताम्—परमत्र पूर्वश्लोकोक्तयोगावैलक्षण्यात् पुनरुक्तिदोषात्केचिदेवं व्याचक्षते। धर्मशब्देन त्रिकोणं कर्मशब्देन केन्द्रस्थानानि ग्राह्याणि। तेन तावुभौ धर्मकर्मणोः केन्द्रत्रिकोणयोर्नेतारौ स्वामिनौ त्रिकोणकेन्द्रयोर्व्यत्ययेन निवसेतां केन्द्रेशस्त्रिकोणे त्रिकोणेशश्च केन्द्रे तदैको राजयोगः। एकत्र व्यत्ययेन वा द्वावपि निवसेतां यथा केन्द्रे वा त्रिकोण एव केन्द्रत्रिकोणाधीशौ निवसेतां तदा द्वितीयोयोगः पूर्वापेक्षया न्यूनो भवेत्। अथवा एक एव तयोर्मध्ये व्यत्ययेन वसेत्तदा तृतीयोयोगः यथा त्रिकोणेशः केन्द्रे वा केन्द्रेशस्त्रिकोणे अथवा चेत् इत्यनेन केन्द्रेशः केन्द्रे त्रिकोणेशस्त्रिकोणे इतियोगव्यत्ययेन निवसेतां तदा योगकारकौ भवेतामिति परमत्रापि प्राचीनमतविरोधादस्वारस्याच्चायमर्थो न युक्तः। तेनात्रग्रन्थसम्बन्धस्यैव प्राधान्यात्सम्बन्धान्पूर्वयोगसाहचर्येणैव वर्णयति। तावुभौ वलिनौ केन्द्रत्रिकोणनेतारावर्थात् धर्मकर्मणोः स्वामिनौ स्वयंदोषयुक्तावपि यदा व्यत्ययेन स्वस्थानयोर्वैपरीत्येन निवसेतामित्यनेनस्थानसम्बन्धः उक्तः। एकत्र निवसेतामित्यनेनैकत्रस्थितिसम्बन्धः उक्तः। अन्यतरो वाप्यर्थादेकोऽन्यस्यराशौ स्थित्वान्यं पश्यति चेदित्यनेन साहचर्य सम्बन्धः उक्तः। अथ वा वसेच्चेदितिकथनात्तुल्ये परस्परदृष्टि योग्ये स्थाने तौ निवसेतामित्यनेनदृष्टि सम्बन्धो द्योतितः तदा योगस्यावश्यंभावित्वात्तौ योगकारकौ भवेतां योगकारकौ भवेतामिति द्विरुक्तिः। सम्बन्धो ग्रन्थान्तरे—

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्यत्यस्ताश्रयसम्बन्धश्चान्योन्यालोकसम्भवः।
एकस्य राशौ संस्थित्या तदीशालोकनादपि।।
सहवासाच्च सम्बन्धा इत्येतेस्युश्चतुर्विधाः।
अत्रापि पूर्वपूर्वाः स्युः सम्बन्धा वलवत्तराः।। ३।।

क्षेमङ्करी—केन्द्रेश (दशमेश) त्रिकोण (नवम) में, त्रिकोणेश (नवमेश) केन्द्र (दशम) में हो, तो यह एक योग हुआ। प्रथम से यह कुछ न्यून है। केन्द्रेश व त्रिकोणेश दोनों केन्द्र में हो अथवा त्रिकोण में हों, यह दूसरा योग हुआ, यह पूर्व से न्यून है। केवल केन्द्रेश त्रिकोण में अथवा केवल त्रिकोणेश केन्द्र में हो, यह तीसरा योग है, यह सबसे न्यून योग हुआ।। ३।।

विमर्श—ग्रन्थकार श्लोक में उदाहरणस्वरुप दशम व नवम भाव को प्रतीक माना है। अतएव कहा जाता है कि नवमेश दशम में व दशमेश नवम में हो, दशमेश व नवमेश दोनों दशम या नवम में स्थित्त हों और दशमेश नवम में हो, या नवमेश दशम में हो, तो प्रबल राजयोग कारक होते हैं। और उत्तरोत्तर अल्पबली होते हैं। केन्द्रों में दशम सर्वाधिक बलिष्ठ और त्रिकोणों में नवम सर्वाधिक बली है। इसीलिए महर्षि पाराशर ने धर्म कर्म भाव की महत्ता दी है।। ३।।

अथ योगेपूत्कृष्टतामाह—

त्रिकोणाधिपयोर्मध्ये सम्बन्धो येन केनचित्।
वलिनः केन्द्रनाथस्य भवेद्यदि सुयोगकृत्।। ४।।

अन्वयः—चेत् त्रिकोणाधिपयोः मध्ये येनकेनचित् बलिनः केन्द्रनाथस्य सम्बन्धः भवेत् तर्हि सुयोगकृत् भवति।। ४।।

संस्कृत—अत्र सम्बन्धगुणं दर्शयति।

त्रिकोणाधिपयोः पञ्चमनवमेशयोर्मध्ये येन केनचित्सह वलिनः केन्द्रनाथस्य लग्नचतुर्थ सप्तम दशमेशानां मध्ये वलवतः सम्बन्धो भवेत्तदा सुयोगकृत् स्यात्। परमत्रपूर्वावैलक्ष्यण्यात् पञ्चमनवमेशयोर्मध्ये यस्य कस्य केन्द्रनाथान्यतरेणवलवत्ता सह सुयोगकृत् सुयोगं करोतीति स्थानसम्बन्धो भवेत्तदा सुयोग कृत्स्यात्—अथवा वलिनः केन्द्रनाथस्य दशमाधिपतेः पञ्चमनवमाधिपत्यन्यतरेण सह यदि सुयोगकृदर्थात्स्थान- सम्बन्धो भवेत्तदा सुयोगकृत् पूर्वलक्षणेन सुफलं विदधातीति।। ४।।

क्षेमङ्करी—किसी त्रिकोणेश का बली दशमेश से सम्बन्ध हो अथवा किसी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

केन्द्रेश का नवमेश से सम्बन्ध हो, तो उत्तम योग होता है। उच्च, स्वगृह, मूलत्रिकोण और स्ववर्ग इनमें जो योगकारक हों, तो भी उत्तम योग होता है।। ४।।

विमर्श—अभिप्राय स्पष्ट है कि सर्वाधिक बली केन्द्र (दशम) के स्वामी और बली त्रिकोणेश (पंचम व नवम) में परस्पर सम्बन्ध हों, तो सर्वोत्तम राज योग बनता है। क्योंकि नवमेश या पञ्चमेश, इनमें किसी के साथ यदि दशमेश का स्थान सम्बन्ध हो, तो भाग्य योग कारक होता है। लेकिन अन्य ग्रहों या भावेशों का जो सम्बन्ध होगा वह स्थान सम्बन्ध के वश अल्प बलवान् होगा। अत: सम्बन्ध के प्रावल्य से योग सिद्ध हो जाएगा।। ४।।

अथ शुभग्रहसम्बन्धेन योगफलप्राप्तिकालमाह—

दशास्वपि भवेद्योग: प्रायशो योगकारिणो:।
दशाद्वयीमध्यगतस्तदयुक् शुभकारिणाम्।। ५।।

अन्वय: —प्रायश: योगकारिणो: दशा द्वयीमध्यगत: तदयुक् शुभकारिणां दशासु अपि योग: भवेत्।। ५।।

संस्कृत—प्रायशो बाहुल्येन योगकारिणो: ग्रहयो: या दशा द्वयी दशाद्वयसमाहार:। तस्यां तदयुक्शुभकारिणां योगकारकग्रहसम्बन्धरहितानां शुभकारिणां दशासु अर्थादन्तर्दशासु योग: शुभप्राप्तिर्भवेत्। यथा नवमदशमाधीशयो: सम्बन्धाद्यदि भाग्ययोग: स्यात्तदा नवमेशस्य दशमेशस्य वा दशायां पञ्चमाधिपतेरन्तर्दशायां भाग्ययोगावाप्ति:। अथवा योगकारिणो: ग्रहयोर्या दशाद्वयी एकस्य दशान्यस्यान्तर्दशा यथा नवमदशमाधीशयो: सम्बन्धे दशमेशस्य दशायां नवमेशस्यान्तर्दशा वा नवमेशस्य दशायां दशमेशस्यान्तर्दशा तन्मध्यगतो योग: तदयुक् शुभकारिणां तत्सम्बन्धरहितानां शुभकारिणां दशासु प्रत्यन्तर्दशादिषु भवेदित्यर्थ:।। ५।।

क्षेमङ्करी—किसी योगकारी ग्रह की दशा हो, उसमें सम्बन्धी योगकारी की अन्तर्दशा हों, तो इन दोनों से सम्बन्ध रहित जो शुभ ग्रह उनकी प्रत्यन्तर्दशा में अवश्य शुभफल की प्राप्ति होती है।। ५।।

विमर्श—केन्द्र व त्रिकोण के पारस्परिक सम्बन्ध से कई प्रकार के योगों का उल्लेख हो चुका है। इस श्लोक में यह चर्चा की गई है कि योग जीवन की किस अवधि में घटित होगा। महर्षि पाराशर के सिद्धान्तानुसार योग का फल योगकारक ग्रहों की दशान्तर्दशा के मध्य पड़ने वाली योगकारकों की दशाद्वयी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(एक की दशा और दूसरे की अन्तर्दशा में सम्बन्ध रहित शुभ ग्रह की प्रत्यन्तर्दशा) में शुभफल मिलता है। कभी कभी देखा जाता है कि योग कारक ग्रहों के मध्य पड़ने वाली शुभ ग्रहों की दशाओं में योग का फल घटित हो जाता है। लेकिन यदि मध्यगत दशा का स्वामी पाराशर के मतानुसार अशुभ हों, तो उसका फल कब मिलेगा, आगे इसे दिया गया है।। ५।।

अथ पापग्रहसम्बन्धेन योगफलप्राप्तिकालमाह—

योगकारकसम्बन्धात्पापिनोऽपि ग्रहाः स्वतः।
तत्तद्भुक्त्यनुसारेण दिशेयुर्योगजं फलम्।। ६।।

अन्वयः —स्वतः पापिनः अपि ग्रहाः योगकारकसम्बन्धात् तत्तद् भुक्त्यनुसारेण योगजं फलं दिशेयुः।। ६।।

संस्कृत—स्वतः पापिनोऽपि ग्रहाः त्रिषडायाधीशा अपि योगकारक सम्बन्धाद्योग-कारकग्रहसम्बन्धेन तत्तद्भुक्त्यनुसारेण तत्तद्ग्रहान्तर्दशानुसारेण योगजं फलमेव दिशेयुः अर्थात् योगकारकग्रहेण सह यदि पापानामपि सम्बन्धश्चेत्तदा तत्र यदि भाग्ययोगावशिष्टत्वं स्यात्तदा पापग्रहा अपि स्व दशायां योगकारकग्रहस्यान्तर्दशायां शुभफलमेव दद्युरिति। एतेन पापानां दशासु तत्सम्बन्धिशुभभुक्तौ शुभफलमेव स्यादिति सूचितम्।। ६।।

क्षेमङ्करी—योगकारक ग्रह के साथ सम्बन्ध होने से त्रिषडायाधीश भी अपनी दशा में शुभग्रह की अन्तर्दशा में शुभ फल ही देते हैं। अर्थात् योगकारक ग्रह के साथ सम्बन्ध होने से पापी ग्रह की दशा में भी जब शुभदायी ग्रह की अन्तर्दशा होती है, तब शुभ ही फल होता है।। ६।।

विमर्श—प्रायः योगकारी ग्रहों से सम्बन्धित ग्रह चाहे शुभ हो या अशुभ वह अपनी मध्यगत दशा में शुभ फल ही करेगा। मारक होने पर भी शुभ फल देगा। यद्यपि उसका मारकत्व कम नहीं होगा। निष्कर्ष यह है कि योगकारक ग्रहों के मध्य में पड़ने वाली मध्यवर्ती दशा का स्वामी ग्रह पाराशरी सिद्धान्तानुसार शुभ होने पर शुभ एवं अशुभ होने पर अशुभ फलदायी होगा।

अतः योग के घटित होने की अवधि योगकारक ग्रहों के दशान्तर्दशा के अनुरूप ही होती है। योगकारक ग्रहों के मध्य पड़ने वाली मध्यवर्ती दशान्तर्दशा में भी योग का फल घटित हो जाता है। यदि मध्यवर्त्ति दशाओं का सम्बन्ध योगकारक

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रहों से हो और वे पाराशर मतानुसार शुभ हों। यहाँ तब भी देखा जाता है कि मध्यवर्त्ति दशाएँ चाहे शुभ हो या अशुभ, योग से सम्बन्धित फल देने में नहीं चुकती है।। ६।।

अथ भाग्ययोगमाह—

केन्द्रत्रिकोणाधिपयोरेकत्वे योगकारकौ।
अन्यत्रिकोणपतिना सम्बन्धो यदि किं परम्।। ७।।

अन्वयः —केन्द्रत्रिकोणाधिपयोः एकत्वे तौ उभौ योगकारकौ भवतः। यदि तु अन्य त्रिकोणपतिना सम्बन्धः, तदा ततःपरं किं स्यात्।। ७।।

संस्कृत—सर्वोत्कृष्टं योगान्तरमाह। केन्द्रत्रिकोणाधिपयोरेकत्वे सति योगकारकौ स्तः तत्र यद्यन्यत्रिकोणपतिना सम्बन्धश्चेत्तदाऽतः परं किमपि न स्यात् अतः परं राजयोगाभाव इति अत्रैकत्वं तु स्थानाधीशत्वेन सम्बन्धेन च द्विवचनान्तत्वात्। अत्र योगविभागः। वृषभ लग्ने केन्द्रत्रिकोणाधिपः शनिर्योगकर्ता तत्रान्यत्रिकोणाधिपतेर्बुधस्य सम्बन्धो भवेत्तदा प्रवलो योगः कर्कट लग्ने दशमपञ्चमाधिपतिर्भौमः तेन गुरोः सम्बन्धश्चेत्तदोत्कृष्टो योगः सिंह लग्ने चतुर्थ नवमाधीशो भौमः पञ्चमाधीशेन गुरुणा सम्बन्धं विदधाति चेत्प्रबलो राजयोगः। तुलालग्ने चतुर्थपञ्चमाधीशः शनिः नवमाधीशेन बुधेन सम्बध्यते तदा राजयोगः। मकर लग्ने पञ्चमदशमाधीशः शुक्रो नवमेशेन बुधेन सम्बन्धवाँश्चेत्तदा प्रवलभाग्ययोगः कुम्भलग्ने चतुर्थनवमाधीशेन शुक्रेण पञ्चमाधीशो बुधस्सम्बन्धं करोति चेत्तदा प्रवलो राजयोगः। सम्बन्धवशादेकत्वेऽन्यत्रिकोणाधीशेन च सम्बन्धे पूर्वदर्शितयोगान्न्यूनो योगो विज्ञेयः। यथा मेषे चतुर्थपञ्चमाधीशयोः शशिसूर्ययोस्सम्बन्धे गुरोरपि सम्बन्धश्चेत्तदापि प्रवलोयोगः परं पूर्वापेक्षयाऽस्य न्यूनत्वम्। अन्यत्रिकोणपतिना सहसम्बन्धं वदताचार्येणत्रिकोणाधिपतेः पापत्वेपि शुभत्वं वर्णितम्। यथा मकरलग्ने अन्यत्रिकोणाधिपतिर्बुधःषष्ठेशः। कर्क लग्ने अन्यत्रिकोणाधिपतिर्गुरुः षष्ठेशः। सिंहलग्ने अन्यत्रिकोणाधिपतिर्गुरुरष्टमेशः कुम्भलग्ने च पञ्चमाधिपतिर्बुधोऽष्टमर्क्षेशः परमेतेषां सम्बन्धाद्भाग्ययोगस्य सर्वोत्कृष्टत्वमेव तेन त्रिकोणाधिपतिः केन्द्राधीशेन सम्बन्धे सर्वथा शुभफलद एवेति।। ७।।

क्षेमङ्करी—केन्द्र और त्रिकोण स्थान के स्वामी यदि एक ही हों, तो योगकारक होते हैं। इसमें यदि दूसरे त्रिकोण के स्वामी के साथ भी सम्बन्ध हो, तो इससे उत्तम अन्य कोई भाग्यकारी योग नहीं होता, अथवा केन्द्रेश के साथ दोनों त्रिकोणेश का सम्बन्ध हो, तो भी परमोत्तम भाग्य योग होता है।। ७।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विमर्श—कोई एक ही ग्रह यदि केन्द्रस्थानों में से किसी एक का और साथ ही त्रिकोणों में से किसी एक स्थान का स्वामी हो, तो योगकारक माना जाता है। इस सिद्धान्त के अनुसार द्वादश लग्नों पर विचार करने से स्पष्ट होता है कि कर्क लग्न में मंगल दशमेश व पञ्चमेश होने से केन्द्रत्रिकोण का एकाधिपति होने से योगकारक है। यदि कर्क लग्न में मंगल स्वराशि उच्चराशि या शुभ ग्रह युत या दृष्ट हों, तो बलवान् हो जाने से शुभफल ही देगा।

इसी प्रकार सिंह लग्न में मंगल चतुर्थेश और नवमेश होने से केन्द्र त्रिकोण का एकाधिपति होने से योगकारक है। यदि मंगल स्वराश्यादि में या शुभ दृष्ट—युत हों, तो बलवान् होने से शुभद ही होगा तुला लग्न में शनि चतुर्थेश व पञ्चमेश होकर उपरोक्तानुसार प्रबल योगकारक है। मकर लग्न में शुक्र ग्रह केन्द्र और त्रिकोणाधिपतित्वेन योगकारक है। कुम्भ लग्न में शुक्र चतुर्थ व नवम के स्वामी होने से योगकारी है। वृष लग्न में शनि दशम व नवम का स्वामी होकर एकाधिपतित्वेन योगकारी है।

वस्तुत: यह योग वृष, कर्क, सिंह, तुला, मकर एवं कुम्भ लग्न की कुण्डलियों में ही घटित होगा। इस प्रकार एकाधिपतित्वेन योगकारक ग्रह का सम्बन्ध किसी अन्य त्रिकोणेश से भी हों, तो परमोत्कृष्ट योग कहा गया, जो समीयीन ही है।। ७।।

अथ राहुकेत्वोर्योगकारकत्वमाह—

यदि केन्द्रे त्रिकोणे वा निवसेतां तमोग्रहौ।
नाथेनान्यतरेणापि सम्बन्धाद्योगकारकौ।। ८।।

अन्वय: —यदि तमोग्रहौ केन्द्रे वा त्रिकोणे निवसेतां, तदा अन्यतरेण अपि नाथेन सम्बन्धात् योगकारकौ भवत:।। ८।।

संस्कृत—राहुकेत्वो: स्थानाभिप्रायेणैव तत्स्वामित्वं यद्यब्द्धावगतावित्यादिनोक्तम्। तत्र त्रिकोणे तयो: स्थितौ केन्द्रनाथे न केन्द्रे स्थितौ त्रिकोणाधीशेन च सह सम्बन्धे पूर्व परिभाषया योग:स्पष्टतर एवेत्यनेनामुमेवार्थं कथयति। यदि तमोग्रहौ राहुकेतू केन्द्रे वा त्रिकोणे निवसेतां तदा तयोरन्यतरेण नाथेन सम्बन्धाद्योगकारकौ भवेताम्। अत्र केन्द्रे स्थित्या केन्द्रनाथेन त्रिकोणे स्थित्या त्रिकोणनाथेन च सम्बन्धाद्योगविशेष: सूचित इति।। ८।।

क्षेमङ्करी—केन्द्र या त्रिकोण में यदि राहु व केतु हों, तो केन्द्रेश वा त्रिकोणेश किसी के साथ सम्बन्ध होने से वे भाग्ययोग कारक होते हैं। परन्तु केन्द्र में त्रिकोणेश

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

के साथ या त्रिकोण में केन्द्रेश के साथ हों, तो विशेष योग जानना चाहिए।। ८।।

विमर्श—यह जाना जा चुका है कि राहु-केतु जिस भाव में स्थित होते हैं, उसी भाव के स्वामी ग्रह के अनुसार फल देते हैं। इस प्रकार केन्द्र में स्थित होकर राहु या केतु त्रिकोणेश से सम्बन्ध करें या त्रिकोण में राहु व केतु स्थित होकर केन्द्रेश से सम्बन्ध (युति या दृष्टि) करेगा तो यह योग उसी तरह फलीभूत होगा जिस प्रकार केन्द्र-त्रिकोणेश के पारस्परिक सम्बन्ध से उत्पन्न होता है।। ८।।

अथ योगभङ्गमाह—

धर्मकर्माधिनेतारौ रन्ध्रलाभाधिपौ यदि।
तयोः सम्बन्धमात्रेण न योगं लभते नरः।। ९।।

अन्वयः—यदि धर्मकर्माधिनेतारौ रन्ध्रलाभाधिपौ स्यातां, तदा तयोः सम्बन्धमात्रेण नरः योगं न लभते।। ९।।

संस्कृत—धर्मकर्माधिनेतारौ नवमदशमाधीशौ तावेव यदि रन्ध्र-लाभाधिपावष्टमैकादशाधिपौ तदा तयोः सम्बन्धमात्रेण नरो योगं न लभते न प्राप्नोति। परन्तु नवम दशमाधीशयोरष्टमलाभेशत्वासंभवः। यतो नवमेशो लाभेशो न भवितुमर्हति तथा दशमेशश्चाष्टमेशो न भवितुं शक्नोति। तथैकत्रैव नवमेशोऽष्टमेशः दशमेशश्च लाभेशो न भवितुमर्हति। समराश्योर्विषमराश्योश्चाधिपत्याभावात्। तेन धर्मकर्माधिनेतारौ यौ अत्र धर्मपदं त्रिकोणबोधकं कर्मपदं च केन्द्र वोधकमर्थात् यौ केन्द्रत्रिकोणाधीशौ। यौ चाष्टमलाभाधीशौ तयोः सम्बन्धश्चेत्तदा नरो योगं न लभत इति निष्कृष्टोऽर्थः। अत्र तु सम्बन्धसत्वे नवमेशोऽष्टमेशो भवेदथवा दशमेशो लाभेशश्चेत्तदा योगस्य न हानिः तथा चतुर्थाधीशस्यैकादशाधीशत्वं पंचमाधीशस्याष्टमाधीशत्वे योगस्य न हानिः। पूर्व-दर्शितपरिभाषया त्रिषडैकादशेशानां सम्बन्धे नापि नवमदशमाधीशयोस्सम्बन्धे भाग्ययोगस्य प्रावल्यम्। परं तथैवाष्टमेशस्य प्रबलपापकर्त्तृत्वत्वात् अष्टगुणकल्पने नवमदशमाधीशयोः सम्बन्धे लाभाष्टमाधीशयोः सम्बन्धेन योगनाशाद्वा चतुर्थपञ्चमनवमदशमेशानां सम्बन्धेपि तृतीयषष्ठाष्टमलाभाधीशानां सम्बन्धेन योगनाशादियं पृथगुक्तिः। इति तृतीयोध्यायः।। ९।।

क्षेमङ्करी—नवमेश (त्रिकोणेश) दशमेश (केन्द्रेश) के अर्थात् केन्द्रत्रिकोण के सम्बन्ध में यदि अष्टमेश और लाभेश का सम्बन्ध हों, तो भाग्ययोग नहीं होता अर्थात् राजयोग भंग माना जाता है।। ९।।

विमर्श—त्रिकोण और केन्द्र भावों के स्वामी ग्रह अष्टमेश और एकारशेश हों,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तो राजयोग भङ्ग माना गया है। जैसे— मेष लग्न में शनि कर्म व एकादश का स्वामी। मिथुन लग्न में धर्म और अष्टम स्थान का स्वामी शनि है। इन दोनों लग्नों में ही यह योग घटित होता है लेकिन यह योग तभी घटित होगा जबकि कुण्डली में राजयोग रहेगा।। ९ ।।

इति दोरमा (सहरसा) निवासिना श्री सूर्यनारायणात्मजेन मैथिलेन डा. सुरकान्त झेत्यनेनुडुदायप्रदीपे सान्वय—क्षेमङ्करीहिन्दी —विमर्शेषु योगाध्यायो तृतीय:।।

❖ ❖ ❖

ल०म०७ CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथायुर्दायाध्याय: —४

अथादावायु:स्थानकथनपूर्वकं मारकस्थानमाह—

अष्टमं ह्यायुष: स्थानमष्टमादष्टमं च यत्।
तयोरपि व्ययस्थानं मारकस्थानमुच्यते।।१।।

अन्वय: —अष्टमं यत् च अष्टमात् अष्टमं तत् आयुष: स्थानम् उच्यते। अपि च तयो: व्ययस्थानं मारकस्थानम् उच्यते।।१।।

संस्कृत—अष्टमं हि आयुष: स्थानमष्टमाद्यदष्टमं तदपि आयुष: स्थानं तयोरपि व्ययस्थानं सप्तमं द्वितीयं च मारकस्थानमुच्यत इत्यन्वय: भाग्यव्ययत्वादष्टमं मुख्यमायुष: स्थानम्। ततो यदष्टममर्थात्तृतीयं बलसाहसादि कारकत्वात्तदप्यायुष: स्थानम्। तयो: व्ययस्थानं स्त्रीधनकारणत्वान्मारकस्थानं तन्निश्चयेनेति।।१।।

क्षेमङ्करी—जन्मलग्न से अष्टम भाव और उस अष्टम भाव से अष्टम भाव अर्थात् लग्न से तृतीय भाव, आयु: स्थान कहलाते हैं। और इनके जो द्वादश अर्थात् सप्तम और द्वितीय, ये मारक स्थान कहे जाते हैं।।१।।

विमर्श—विदित हुआ कि लग्न से अष्टम आयु: स्थान है क्योंकि अष्टमेश ही सर्वाधिक पापी माना गया है। अत: कुण्डली में सर्वाधिक शुभ भाव नवम भाव (भाग्यस्थान) का व्ययभाव होने से अष्टम भाव का परम अशुभ होना समीचीन ही है। इसी तरह अष्टम से अष्टम भाव (लग्न से) तृतीय स्थान भी आयु स्थान होगा। इन दोनों स्थानों के व्यय भाव क्रमश: सप्तम व द्वितीय होते हैं। वस्तुत: ये दोनों मारक स्थान हैं, जैसा ऊपर भी बताया गया है, जैसे आयुस्थान प्रधान और गौण दो हैं। उसी प्रकार मारक स्थानों में भी प्रधान (सप्तमभाव) और गौण (द्वितीय भाव) मारकस्थान कहा गया है। परन्तु आचार्य का इस पाराशरी सिद्धान्त में इसके विपरीत विचार आगे व्यक्त हुआ है।।१।।

तत्र सप्तमापेक्षयाद्द्वितीयस्य बलमधिकमाह—

तत्राप्याद्यव्ययस्थानाद्द्वितीयं वलवत्तरम्।।१ १/२।।

अन्वय: —तत्र अपि आद्यव्ययस्थानात् द्वितीयं बलवत्तरं भवति।।१ १/२।।

संस्कृत—तत्र मारकराशावपि आद्यव्ययस्थानात्सप्तमात् द्वितीयं यद्व्ययस्थानं लग्नाद्द्वितीयं तत्प्रवलं मारकस्थानम् यत्तु कैश्चिल्लग्नाद्गणनां स्वीकृत्य द्वितीयात्सप्तमं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वलवत्तरमित्युक्तं तदयुक्तं क्रमिकगणनाया: प्रावल्यात्सप्तमस्य प्रथममुपादानाच्चेति। अथ मारकसमयस्य वक्ष्यमाणत्वात् तन्निश्चयकारणभूतमायुर्दायनिश्चयं ग्रन्थान्तरात्संगृह्यात्र लिख्यते—

देहताततनिधनाधिपा यदा लाभवन्धुसुतधर्मसंस्थिता:।
दीर्घमायुरिह विद्धि तत्परं केन्द्रगाश्च खलु दीर्घदा मता:।।
सहजबन्धुगता: खलखेचरा: पणफरेऽपि गता यदि केचन।
त इहमध्यमदा: परतश्च ये त इह लाघवखण्डकरा मता:।।

अन्यच्च—

अल्पायुर्लग्नपे भानो: शत्रौ मध्ये च मध्यमम्।
मित्रे लग्नेश्वरे तस्य दीर्घमायुरुदाहृतम्।।

अन्यच्च।

आयु: पितृदिनेशाभ्याम् (१)
प्रथमयोरुत्तरयोर्वा दीर्घम् (२)
प्रथमद्वितीययोरन्त्ययोर्वा मध्यम् (३)
मध्ययोराद्यन्तयोर्वा हीनम् (४)
एवं मन्दचन्द्राभ्याम् (५)
पितृकालतश्च (६)
संवादात्प्रामाण्यम् (७)
विसंवादे पितृकालत: (८)

पितृलाभगेचन्द्रे चन्द्रमन्दाभ्याम् (९) अस्यार्थ:। लग्नेशाष्टमेशौ यदि चरराशौ वा स्थिरद्विस्वभावयोर्भवतस्तदा दीर्घायु: द्विस्वभाव राशौ वा चरस्थिरयोर्यदि भवतस्तदा मध्यायु:। स्थिरराशौ वा चरद्विस्वभावयोर्यदि भवतस्तदाल्पायु:। एवमेव यदि चन्द्रो लग्ने वा सप्तमे भवेत्तदा लग्नचन्द्राभ्यामन्यथा शनिचन्द्राभ्यां दीर्घादियोगो विचार्य:। तथा लग्नहोरालग्नाभ्यामपि तथैव विचार्य:। अत्र प्रकारत्रयेणाऽपि यद्येकरूपायुस्तदा तन्निर्विवादमेव। तथाऽभावे प्रकारद्वयागतायुर्ग्राह्यम्। विंसवादे लग्नहोरा लग्नाभ्यामागतमायुर्ग्राह्यमिति।

होरा लग्नानयनम्— घाटिकादिकमिष्टं द्विगुणं कृत्वा पञ्चभिर्भजेत्तदा लब्धं राश्यादिकं स्यात्तत्सर्वदा स्पष्टरवौ योजनीयं तदा होरलग्नं भवतीति।

अथायु: खण्डादिमानम्—

रसाङ्कैर्गजाश्रेन्दुभि: शून्यमासै। स्त्रिधा दीर्घमायु: कलौ संप्रदिष्टम्।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतु:षष्टिबाह्वद्ग्रशीतिप्रमाणै र्मतं मध्यमायु: नृणां वत्सरै: स्यात्।।
तथाद्वित्रि (३२) षड्वह्नि (३६) शून्याब्धि (४०) वर्षै: भवेदल्पमायुर्नराणां युगान्ते।।

अत्रनिश्चय:। पूर्वोक्तयोगैरेकप्रकारेणाल्पायुषि चत्वारिंशत् प्रकारद्वयेन षट्त्रिंशत् प्रकारत्रयेण द्वात्रिंशत्। दीर्घायुषि प्रकारेणद्वात्रिंशत् प्रकाराभ्यां षट्त्रिंशत् प्रकारै: चत्वारिंशदब्दरूपं खण्डं ग्राह्यम्। मध्ये तु लग्नेशाष्टमेशाभ्यां चत्वारिंशत् लग्नचन्द्राभ्यां वा शनिचन्द्रभ्यां षट्त्रिंशत् लग्नहोरालग्नाभ्यां द्वात्रिंशदब्दरूपं खण्डं ग्राह्यम्। वक्ष्यमाणप्रकारेणाप्यायुर्निश्चये खण्डनिश्चयस्त्वत्रैवोक्तो ग्राह्य:। अन्यथायुर्निश्चय:।

पितृलाभरोगेशप्राणिनि कण्टकादिस्थे स्वतश्चैवं त्रिधा।।

अस्यार्थ:। लग्नसप्तमाष्टमेशयोर्यो वली स यदि केन्द्रे भवेत्तदा दीर्घायु: पणफरे मध्यायु: आपोक्लिमेऽल्पायु: रव्यादिग्रहाणां मध्ये योऽधिकांश:। असावात्मकारक: तदष्टमेश: तत्सप्तमाच्च योऽष्टमेश:। अनयोर्यो वली स यदि कारकात्केन्द्रादिषु स्थितश्चेत्तदा दीर्घाद्यायु:। अत्र लग्नं कारकश्च विषमे भवेत्तदाक्रमत: समे तदोत्क्रमत अष्टमादिकं ग्राह्यम्। विषमे लग्ने कारको यदि तृतीये भवेत्समे यदि लाभगो भवेत्तदा केन्द्रस्थित्या वलवतोऽष्टमेशस्याल्पायु: पणफरे मध्यायु: आपोक्लिमे दीर्घायु:। परं यदि कारक एवाष्टमेशो भवेद्वाष्टमेशस्य कारकेण सह युते सर्वदा मध्यायुरेवेति संक्षेपत आयुर्विचार:।।१ १/२।।

क्षेमङ्करी—सप्तम और द्वितीय भाव मारक स्थान कहे गये हैं, इन दो मारक स्थानों में सप्तम से द्वितीय प्रबल मारक होता है।।१ १/२।।

विमर्श—ऊपर हमने आयु व मारक स्थान के बारे में पढ़ा है। अत: बाल बोधार्थ आयुर्दाय विचार पर संक्षेप में प्रकाश डालते हैं— लग्नेश यदि सूर्य का मित्र हो, तो दीर्घायु, सम हो, तो मध्यायु, शत्रु हो, तो अल्पायु जानना चाहिए।

एवं लग्न, दशम और अष्टम का स्वामी केन्द्र या एकादश या त्रिकोण में हो, तो दीर्घायु करते हैं और जो ग्रह केन्द्र में हो, तो दीर्घायु करते हैं। तृतीय और चतुर्थ भाव में पापग्रह हो अथवा पणफर में कोई ग्रह हो, तो वह मध्यायु करता है। अन्य स्थान गत ग्रह अल्पायु करते हैं।

एवं लग्नेश और अष्टमेश यदि चर राशि में हों अथवा एक स्थिर राशि में और दूसरा द्विस्वभाव में हो, तो दीर्घायु। दोनों स्थिर राशि में हो अथवा एक चर में और दूसरा द्विस्वभाव में हो, तो अल्पायु होता है। यदि द्विस्वभाव में या एकस्थिर और

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दूसरा चर राशि में हो, तो मध्यायु जानना चाहिए। लग्न या सप्तम में यदि चन्द्रमा हो, तो लग्न चन्द्रमा से अन्यथा शनि चन्द्रमा से और जन्म लग्न और होरा लग्न से भी इसी प्रकार आयुर्दाय का विचार करना चाहिए। इसमें तीनों प्रकार से या दो प्रकार से, जो आवे, उसको मानना चाहिए। यदि तीनों प्रकार से तीन प्रकार की आयु प्राप्त हो, तो जन्मलग्न और होरालग्न से, जो आवें, उसे मानना चाहिए।

एवं लग्न यदि विषम हो, तो क्रम से और सम हो, तो उत्क्रम से जो अष्टमेश और द्वितीमेश हो उनमें जो बलवान् हो, वह केन्द्र में हों, तो दीर्घायु, पणफर में हो, तो मध्यमायु कही गई है। आपोक्लीम में हो, तो अल्पायु होता है। इसी प्रकार कारक का, जो अष्टमेश और द्वितीयेश हो उनमें जो बलवान् हो, वह यदि कारक से केन्द्रादि में हो, तो दीर्घ, मध्य और अल्प क्रम से जानना चाहिए। लग्न विषम हो, तो यदि कारक तृतीय में हो, समलग्न होने पर यदि एकादश में हो, तो केन्द्र में अल्पायु पणफर में मध्यायु, आपोक्लीम में दीर्घायु जानना चाहिए। और कारक तथा अष्टमेश एक ही हों वा साथ तैठे हों, तो सर्वदा मध्यायु ही जानना चाहिए।। १ १/२।।

अथात्र मारकक्रम निर्णयमाह—

तदीशितुस्तत्र गताः पापिनस्तेन संयुताः।। २।।
तेषां दशाविपाकेषु संभवे निधनं नृणाम्।।
तेषामसंभवे साक्षाद्व्ययाधीशदशास्वपि।। ३।।

अन्वयः—तद् ईशितुः तथा तेन संयुताः तत्र गताः ये पापिनः तेषां च सम्भवे दशाविपाकेशु नृणां निधनं वाच्यं तेषाम् असम्भवे सति व्ययाधीशदशासु अपि नृणां मरणं वाच्यं।।२—३।।

संस्कृत—ग्रन्थान्तरादायुषो निश्चयं कृत्वा तदीशितुर्मारकेशस्य दशाविपाकेषु दशान्तर्दशादिरूपसमयेषु तत्र गताः मारकस्थानगता ये पापिनस्तेषां दशान्तर्दशादिषु वा तेन मारकेशेन संयुता ये पापिनो ग्रहास्तेषां दशान्तर्दशादिषु संभवे आयुषः समाप्तौ निधनं नृणां स्यादिति। तेषां मारकमारकस्थानगतमारकेशयुतानां दशादिसमयानाम-संभवेऽप्राप्तौसाक्षाद्व्ययाधीशस्य लग्नात् द्वादशाधीशस्यदशासु निधनं स्यादिति।। २-३।।

क्षेमङ्करी—मारकेश ग्रह की दशादि समय में मारक स्थान में अथवा मारकेश ग्रह के साथ जो पापी ग्रह त्रिषडायेश हो उनकी दशान्तर्दशादि में यदि आयुर्दाय का अन्त होता हो, तो निधन कहना चाहिए यदि आयुः खण्ड के समाप्ति समय में इन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रहों की दशादि समय की प्राप्ति न हो, तो लग्न से जो व्ययेश उसके दशान्तर्दशादि रूप समय में मरण कहना चाहिए।। २-३।।

विमर्श—सप्तमस्थान और द्वितीय स्थान मारक स्थान है। कुण्डली में मारक ग्रहों का निर्णय इस प्रकार करना चाहिए-

- सप्तमेश ग्रह एवं वे पापग्रह जो इससे किसी न किसी रूप में जुड़े हुए हों। इसी प्रकार द्वितीयेश व इससे सम्बन्धित पापग्रह को भी मारक समझना चाहिए।
- अष्टमेश और इससे सम्बन्धित पापग्रहों को भी मारक समझना चाहिए।
- बारहवें भाव का स्वामी और इससे सम्बन्धित पापग्रहों को भी मारक समझना चाहिए।
- प्रत्येक लग्न के लिए मारक इस प्रकार समझने चाहिए -

लग्न	मारक	प्रबलमारक
मेष	शुक्र	शुक्र
वृष	बुध, गुरु	मंगल
मिथुन	चन्द्र, शनि	गुरु
कर्क	सूर्य	शनि
सिंह	बुध, गुरु	शनि
कन्या	शुक्र, मंगल	गुरु
तुला	शुक्र	मंगल
वृश्चिक	गुरु, बुध	शुक्र
धनु	बुध, चन्द्र	शनि
मकर	सूर्य, शनि	चन्द्र
कुम्भ	गुरु, बुध	सूर्य
मीन	मंगल, शुक्र	बुध

यह विभिन्न कुण्डली के ग्रहों की स्थिति के अनुसार जो भी तात्कालिक परिस्थितियाँ बनती हैं, उनके अनुरूप उपर्युक्त प्रबल मारक परिवर्तित हो सकते हैं।। २-३।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ तदसम्भवेमारकनिर्णयमाह—

अलाभे पुनरेतेषां सम्बन्धेन व्ययेशितु:।
क्वचिच्छुभानां च दशाह्यष्टमेश दशासु च।।४।।

अन्वय: —पुन: एतेषाम् अलाभे तदीशितु: सम्बन्धेन शुभानां च दशासु मरणं वाच्यम्। क्वचित् तेषाम् अपि अलाभे अष्टमेशदशासु मरणं वाच्यम्।।४।।

संस्कृत—पुनश्चैतेषां द्वादशेशसमयानामलाभे व्ययेशितुर्व्ययेशस्य सम्बन्धेन क्वचिच्छुभानां च दशा निधनदा। तथाष्टमेशदशासु दशान्तर्दशादिरूपसमयेषु मरणं वाच्यमित्यर्थ:।।४।।

क्षेमङ्करी—यदि पूर्वोक्त ग्रहों की दशा न मिलती हो, तो द्वादशेश के सम्बन्ध से कहीं-कहीं शुभ ग्रहों की भी दशा में मरण कहना चाहिए और यदि इनकी दशा की भी प्राप्ति न हो, तो अष्टमेश की दशा—अन्तर्दशा और प्रत्यन्तर्दशादि समय में मरण कहना चाहिए ।।४।।

विमर्श—यहाँ द्वादशेश, द्वादशेश का सम्बन्धि शुभग्रह और अष्टमेश, इनमें किसी की दशान्तर्दशादि में क्रम प्राप्ति के अनुसार मरण की बात आचार्य ने किया है। इसके अभाव में कब मरण होगा, आगे बता रहे हैं।।४।।

अथ तन्मारकाभावे निर्णयमाह—

केवलानाञ्च पापानां दशासु निधनं क्वचित्।
कल्पनीयं बुधैर्नृणां मारकाणामदर्शने।।५।।

अन्वय: —केचित् सर्वेषां मारकाणाम् अदर्शने बुधै: केवलानां पापानां दशासु च नृणां निधनं कल्पनीयम्।।५।।

संस्कृत—क्वचित् कुत्रापि पूर्वोक्तानां मारकाणामदर्शनेऽप्राप्तौ केवलानाञ्च पापानां त्रिषडायाधीशानां दशासु नृणां निधनं कल्पनीयम्। अत्रायु: खण्डस्यापूर्तौ समागतायां मारकदशायां शारीरिकक्लेशस्यैव प्राबल्यं न तु मारकयोग इति।।५।।

क्षेमङ्करी—यदि उपर्युक्त मारकेशों की दशा भी प्राप्त न हो, तो केवल पाप ग्रह त्रिषडायेशादि के दशाओं में मरण की कल्पना करनी चाहिए।।५।।

विमर्श—अबतक हमने द्वादशभावों में २,७ स्थान को मारक और उसमें भी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तम से प्रबल द्वितीय स्थान को जाना है। अब पूर्वोक्त मारक ग्रहों का निर्णय इस प्रकार करेंगें –

(१) सप्तमेश– द्वितीयेश और केन्द्रेश गुरु–शुक्र से आरम्भ करके आगे, जो कहे जाऐंगे, उनमें से जो ग्रह मारक स्थान में पड़े हों अथवा नीच राशि के हों, अस्तंगत हों, पापयुक्त हों, पापक्रान्त हो, शत्रुओं की राशि में हो इत्यादि पापयुक्त दोषों से दूषित हों, ऐसा सम्भव हो, तो उनकी दशा–अन्तर्दशा में मनुष्यों का मरण होता है।

(२) ऐसे ग्रह जब उपलब्ध न हो, तो द्वादशेश मारकस्थान में हो अथवा पूर्वोक्त पापयुक्त दोषों से दूषित हो, तो उसकी दशा में मरण जानना चाहिए। यह भी सम्भव न हो, तो फिर–

(३) सप्तमेश, द्वितीयेश, केन्द्राधिपति गुरु व शुक्र या द्वादशेश क्रम से इनके सम्बन्धी वैसे हों अर्थात् पूर्वोक्त दोष से युक्त हों, तो उनकी दशा में मरण जानना चाहिए।

(४) इतने प्रकारों से भी मारक न दिखे, तो अष्टमेशादि पापग्रह क्रम से पूर्वोक्त प्रकार दोषी हों, उनकी दशा में मरण जानना चाहिए।

(५) ऐसा भी सम्भव न होने पर शुभ भी जो वैसा हो अर्थात् मारकस्थान में हों, पापी हो या किसी भी प्रकार दोषयुक्त शुभग्रह की दशा में मरण समझना चाहिए।

(६) उपरोक्त भी सम्भव न होने पर केवल पाप ग्रह, अष्टमेश आदि की दशा में ही क्रम से मरण जानना चाहिए। इसके लिए यह आवश्यक नहीं कि वे पापी मारकेश हो, नीचादि दोष युक्त हो आदि फिर भी वे मारक होते हैं।

उपरोक्त का सारभाव यह हुआ कि उसी ग्रह की दशार्न्तशा मारक योग्य होगा जब, वस्तुत: वह कहीं से भी दोषयुक्त या पापी होगा। इससे यह अभिप्राय स्पष्ट हुआ कि शुभ ग्रह मारक नहीं होता, मारक होने के लिए दोषी होना आवश्यक है। इसी प्रकार नैसर्गिक पाप ग्रह में भी शुभता की अधिक सम्भावना हो, तो समझना चाहिए कि वह भी मारक नहीं होगा।

यहाँ यह भी विचार करें कि मारकेश को जिस क्रम में बतलाया गया है। वहाँ पूर्व से पर हीन मारक है। पूर्व की क्रम प्राप्ति में पर की क्रम प्राप्ति पर विचार करना व्यर्थ है। सभी पूर्वोक्त मारकेशों की दशा के अभाव में ही मात्र पापी अर्थात् अष्टमेश, एकादशेश, षष्ठेश व तृतीयेश की दशाओं में निधन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्भव होगा, यह जानना चाहिए। और इस क्रम में यदि मारकेश का अभाव हो जाए, तो वहाँ शनि मारक हो जाएगा, क्योंकि शनि के लिए किसी शर्त की अपेक्षा नहीं कही गई। अग्रिमश्लोक में यह स्पष्ट हो जाएगा।। ५।।

अथ मारकनिर्णये शनेर्विशेषतामाह—

मारकैः सह सम्बन्धान्निहन्ता पापकृच्छनिः।।
अतिक्रम्येतरान् सर्वान् भवत्येव न संशयः।। ६ ।।

अन्वयः —पापकृत् शनिः मारकैः सह सम्बन्धात् इतरान् सर्वान् अतिक्रम्य निहन्ता भवति एव, अत्र संशयो नास्ति।। ६।।

संस्कृत—पापकृच्छनिः प्रकृत्या पापफलकर्ता शनिः वा त्रिषडायाधीशत्त्वेन पापकृच्छनिः मारकैः मारकेशग्रहैः सह सम्बन्धात्सर्वान्मारकानतिक्रम्योल्लंध्य निहन्ता मारकः स्यादत्र न संशयो न सन्देहः। यदा च शनेः पापकर्तृत्वेन मारकसन्बन्धात्प्रवलं मारकेशत्वं स्यात् तदा मारकाधीशस्य शनेः मारकैर्वा पापग्रहैः सम्बन्धादतीवप्रावल्यमिति। अत्र मारकलक्षणे येन केन प्रकारेणापि पापत्वस्यैव मुख्यत्वमिति।। ६।।

क्षेमङ्करी—पापफल करने वाला जो शनि वह मारक ग्रहों के साथ सम्बन्ध करने से सब मारक ग्रहों को लाँधकर आप ही मारक होता है, इसमें सन्देह नहीं करना चाहिए।। ६।।

विमर्श—शनि ग्रह दुःख देने में तत्पर रहता है। शनि मारक ग्रहों में राजा है इसीलिए चाण्डालों का स्वामी भी इसे कहा गया है। यदि शनि मारक हो, तो शेष मारकों के विचार की जरुरत नहीं रहती। यह स्पष्ट रुप से जान लेना चाहिए, यदि शनि मारकेशों से सम्बन्ध नहीं रखता हो, तो प्रबलतम मारक ग्रह ही मरण देगा। लेकिन यदि शनि को कम मात्रा में भी मारकत्व प्राप्त हो, तो वह स्वयं ही मृत्यु देने वाला होगा। यह तभी सम्भव है जबकि वह पापी हो अर्थात् त्रिकोणेश या केन्द्रेश होकर यदि वह त्रिषडायेश भी होगा तो भी पापी माना जाएगा। यदि शनि सप्तमेश के साथ साथ अष्टमेश भी हो, तो वह स्वयं मारक ही होगा। इसमें सन्देह नहीं करनी चाहिए। जैसेकि कर्क लग्न में यह स्थिति बनती है जहाँ शनि सप्तमेश के साथ अष्टमेश भी होता है। यहाँ यहीं आशय है कि शनि स्वयं पापी है या मारकेश है या मारक सम्बन्धी है, तो निश्चय ही वह मारक होगा। शनि में यह योग्यता है कि वह पापी और मारकेशों से सम्बन्ध रखने के बाद समस्त मारकों को हटाकर स्वतः मारक

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बन जाता है। लेकिन जहाँ शनि के मारक रहने के बावजूद आयु की अधिकता रहती है, उस स्थिति में आयु, काल के किस खण्ड तक है, इसका विचार भी अवश्य करना होगा।

एवं जातक को अल्पायु, मध्यायु या दीर्घायु में से क्या प्राप्त है, यह निर्णय कर मध्यायु या दीर्घायु की स्थिति में यदि मारकेशों की दशा आती है, तब भी मृत्यु नहीं होती है, अपितु मृत्युतुल्य कष्ट होता है, फिर मारकदशा भी बीत जाती है। अत: आयु जिस काल खण्ड तक पड़े, उसी खण्ड में मारक पड़े तभी मृत्यु देगा। ऐसा जानना चाहिए।। ६।।

स्पष्टायुर्ज्ञानविधिः—

परमायुः प्रमाणेन गुणयेत् गत नाडिकाः।
नक्षत्रस्य हरेद्भागं नवत्याप्तं विशोधयेत्।।
परमायुषि प्रुंसश्च शेषमायुः स्फुटं भवेत्। (गौरी जातके)

अर्थात् परमायु १२० वर्ष से भयात में गुणाकर उसमें ९० का भाग देने पर जो लब्धि होती है, उसे परमायु (१२०) वर्ष में से घटा दें, तो स्पष्ट आयु ज्ञात होती है।

- सर्वप्रथम कुण्डली में जातक कि दीर्घायु, मध्यायु या अल्पायु क्या है, देखें।
- दीर्घायु न्यूनतम ९६ वर्ष तक और अधिकतम १२० वर्ष तक कही गई है।
- मध्यायु ६४ से ८० समझनी चाहिए।
- अल्पायु ३२ से ४० वर्षान्तकाल तक समझनी चाहिए।
- दीर्घायु, मध्यायु और अल्पायु का निर्णय कम से कम जैमिनी मतानुसार इस प्रकार कर लेनी ही चाहिए।

१. दीर्घायु— चर राशि का लग्नेश और चर राशि का अष्टमेश
स्थिर राशि का लग्नेश और द्विस्वभाव का अष्टमेश
द्विस्वभाव का लग्नेश और स्थिर राशि का अष्टमेश

२. मध्यायु— चर राशि का लग्नेश और स्थिर राशि का अष्टमेश
स्थिर राशि का लग्नेश और चर राशि का अष्टमेश
द्विस्वभाव का लग्नेश और द्विस्वभाव राशि का अष्टमेश

३. अल्पायु— चर राशि का लग्नेश और द्विस्वभाव का अष्टमेश

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्थिर राशि का लग्नेश और स्थिर राशि का अष्टमेश
द्विस्वभाव का लग्नेश और चर राशि का अष्टमेश

यहाँ ध्यानार्ह है कि जो आयु तीन या दो प्रकार से प्राप्त हो, वही लेनी चाहिए। यदि तीनों प्रकार से आयु भिन्न-भिन्न प्राप्त हो, तब जन्म व होरा लग्न से प्राप्त आयु स्वीकार करनी चाहिए इस सम्बन्ध में पहले भी लिखी जा चुकीं है। विशेष ज्ञानपिपासुओं को जिज्ञासा तृप्ति के लिए हमारी पुस्तक 'भारतीय ज्यौतिष' का अवलोकन करना चाहिए।। ६।।

इति दोरमा (सहरसा) निवासिना
श्री सूर्यनारायणात्मजेन मैथिलेन डा. सुरकान्त झेत्यनेनुडुदायप्रदीपे सान्वय
क्षेमङ्करीहिन्दी–विमर्शेष्वार्युदायाध्यायो चतुर्थः।

❖ ❖ ❖

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ दशाफलाध्याय: —५

अथ ग्रहाणां दशाफलमाह—

न दिशेयुर्ग्रहा: सर्वे स्वदशासु स्वभुक्तिषु।
शुभाशुभफलं नृणामात्मभावानुरूपत:।।१।।

अन्वय: —सर्वेग्रहा: स्वदशासु स्वभुक्तिषु च आत्मभावानुरुपत: नृणां शुभाशुभफलं न दिशेयु:।।१।।

संस्कृत—न दिशेयुरिति— सर्वे सकला: ग्रहा: सूर्यचन्द्रमंगलराहु गुरुशनि बुध केतुशुक्रादय: स्वदशासु आत्ममहादशासु षड्दशसप्ताष्टादशषोडशैकोनविंशति सप्तदश सप्त विंशत्यादिरूपात्मकासु, स्वभुक्तिषु आत्मान्तर्दशासु, आत्मभावानुरूपत: आत्मनो यो भाव: स्वभाव: तदनुरूपतस्तदनुसारत:, नृणां मनुष्याणां शुभाशुभफलं न दिशेयु: न दद्यु: तस्य ग्रहस्य य: स्वभावस्तया फलं न दद्युस्ततोऽल्पं दद्युरेव स्वान्तर्दशायामन्यफलस्यानवकाशादित्यर्थ:।।१।।

क्षेमङ्करी—सभी ग्रह (शुभ व पाप) अपनी महादशा के अपनी स्वयं की अन्तर्दशा काल में अपनी प्रकृति के अनुरूप जातक को शुभ वा अशुभ फल नहीं देते अर्थात् सामान्य शुभ या अशुभ फल देते हैं।।१।।

विमर्श—ग्रन्थकार का अभिप्राय स्पष्ट है कि सूर्यादि ग्रह अपनी अपनी महादशा काल के आरम्भ में जब उनकी अपनी अन्तर्दशा आती है, वे अपने प्रकृति स्वभाव या अपने गुणधर्म के अनुसार फल नहीं करते हैं, सामान्य शुभ वा अशुभ फल ही देते हैं। इस प्रकार यह भी स्पष्ट जान पड़ता है कि कोई ग्रह सम्पूर्ण दशा काल में हमेशा एक जैसा शुभाशुभ फल नहीं देते हैं। फल प्राप्ति न्यूनाधिक होता ही है।।१।।

अथ आत्मसम्बन्धिग्रहाणां दशाफलमाह—

आत्मसम्बन्धिनो ये च ये वा निजसधर्मिण:।
तेषामन्तर्दशास्वेव दिशन्ति स्वदशाफलम्।। २।।

अन्वय: —ये आत्मसम्बन्धिनो वा ये निजसधर्मिण: च तेषाम् अन्तर्दशासु एव स्वदशाफलं दिशन्ति।। २।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृत—आत्मसम्बन्धिन इति— आत्मसम्बन्धिन: आत्मन: स्वस्य सम्बन्धिन: सहावस्थानादि सम्बन्धचतुष्टय रूपात्मक: सम्बन्धो विद्यते येषु ते आत्मसम्बन्धिन:, ये ग्रहा: निजसधर्मिण: समानोधर्म: सधर्म: सधर्म एषामस्तीति सधर्मिण: निजेनात्मना सधर्मिण: इति निजसधर्मिण:। ये च ग्रहा: तेषां ग्रहाणाम्, अन्तर्दशासु स्वदशायामेव स्वदशाफलं दिशन्ति।। २।।

एवं तत्र सम्बन्धचतुष्टयं पूर्वं व्याख्यातम्। केन्द्रेशा: परस्परं सधर्मिण: त्रिकोणपतय: परस्परं सधर्मिणश्च, त्रिषडायाधीशा: परस्परं सधर्मिणश्च भवन्ति। तत्रैवाष्टमेशस्य सर्वथा पृथक् धर्मोऽस्ति। अन्यप्रकारेण लग्नेशसप्तमेशौ, द्वितीयेश द्वादशेशौ, तृतीयेशैकादशेशौ चतुर्थेशदशमेशौ, पञ्चमेशनवमेशौ तथा च षष्ठेशाष्टमेशौ, इमे परस्परं सधर्मिण: भवन्ति। अतएव स्वदशायां स्वसम्बन्धिनां सधर्मिणाञ्च ग्रहाणामन्तर्दशागत:, तत्समये स्वस्वभावानुरूपं पूर्णं फलं ग्रहा: प्रदिशन्ति।। २।।

क्षेमङ्करी—जो ग्रह अपनी सम्बन्धी हो, सधर्मी हो उसकी अन्तर्दशा काल में अपनी दशा के दशाफल को अपनी प्रकृति स्वभाव गुणधर्मानुरूप विशेष प्रकार से देते हैं।। २।।

विमर्श—ग्रन्थकर्त्ता ने यहाँ यह बताने का प्रयास किया है कि विशेष अवसर के प्राप्त होने पर ही ग्रह विशेषफल करते हैं। जैसे– संसार में किसी कुटुम्ब–सम्बन्धी या विशेष अतिथि के आने पर लोग सामान्य दिनचर्या को छोड़कर भी उनका स्वागत सत्कार में लग जाते हैं। उसी प्रकार किसी भी ग्रह की अपनी महादशा में अपनी सधर्मी या सम्बन्धी ग्रह के आने पर वह अपनी स्वभावानुकूल शुभाशुभ फल को करते हैं। फिर उनके जाने पर अपनी सामान्य दिनचर्या में लग जाते हैं। सम्बन्ध चार प्रकार के हैं, जिसे हम जान चुके हैं। जैसे—

१. जब ग्रह एक–दूसरे की राशि में स्थित हो।

२. दोनों एक दूसरे को पूर्ण दृष्ट्या देख रहे हो।

३. ग्रह जब अपनी राशि में स्थित ग्रह को पूर्ण दृष्ट्या देखता हो।

४. जब दो ग्रह एक राशि या स्थान में युति करे।

सधर्मी ग्रह से तात्पर्य यह है कि जो अपने जैसा हो अर्थात् परस्पर गुणधर्म स्वभाव में समानता हो। जैसे– केन्द्रेश ग्रह केन्द्रेश के, त्रिषडायेश–त्रिषडायेश के, त्रिकोणेश–त्रिकोणेश के सधर्मी या सहधर्मी हुए।। २।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथासम्बन्धिनां ग्रहाणां फलमाह—

इतरेषां दशानाथविरूद्धफलदायिनाम्।
तत्तत्फलानुगुण्येन फलान्यूह्यानि सूरिभिः ।। ३ ।।

अन्वयः—सूरिभिः दशानाथ विरूद्ध फलदायिनाम् इतरेषां तत्तत्फलानुगुण्येन फलानि ऊह्यनि।। ३ ।।

संस्कृत—इतरेषामिति— सूरिभिः विद्वद्भिः दशानाथ विरूद्धफलदायिनां दशायाः पाकस्य यो नाथः स्वामी तस्य विरूद्धं यत्फलं तद् दशानाथ विरूद्धफलं तद् दातुं शीलं येषां ते दशानाथविरूद्धफलदायिनस्तेषाम्, इतरेषां स्वसम्बन्धसमानधर्मरहितानां ग्रहाणां, तत्तत्फलानुगुण्येन तस्य तस्य दशान्तर्दशास्वामिनां फलानाम् आनुगुण्येन अनुगुणस्य भावः आनुगुण्यं गुणसाम्यं तेन, फलानि दशाफलानि, ऊह्यानि प्रकल्पनीयानि।

एवं तत्र ग्रहा द्विधा यथैके सम्बन्धिनोऽन्येऽसम्बन्धिन इति। तेऽपि षड्विधा भवन्ति। सम्बन्धिनः सधर्मिणः, असम्बन्धिनो विरूद्धधर्मिणः, सम्बन्धिनोऽनुभयधर्मिणः. असम्बन्धिनः सधर्मिणः, असम्बन्धिनो विरूद्धधर्मिणः, असम्बन्धिनोऽनुभयधर्मिण इति। तत्र ये सम्बन्धिनः सधर्मिणश्च सन्ति, तेषां फलं सर्वथा उत्तमेव स्यात्। तेभ्यो न्यूनं फलं सम्बन्धिनामनुभयधर्मिणां, तेभ्योऽपि न्यूनं फलं सम्बन्धिनं विरूद्धधर्मिणामिति।। ३ ।।

क्षेमङ्करी—दशापति ग्रह के असम्बन्धी, विपरीतधर्मी अर्थात् सहधर्मिता और सम्बन्ध रहित ग्रहों की अन्तर्दशा में दोनों ग्रहों के फलों में सामन्जस्य पूर्ण दशाफल की विवेचना करनी चाहिए। अर्थात् विरूद्धधर्मी ग्रह की दशा और अन्तर्दशा के स्वामी के अनुसार दशाफल की कल्पना करनी चाहिए।। ३ ।।

विमर्श—यहाँ ग्रन्थकर्त्ता यह बताने का प्रयास किया है कि ग्रह समानधर्म या सधर्म या सहधर्म वाले हो सकते हैं अथवा विपरीत धर्म वाले अथवा समधर्मी भी ग्रह हो सकते हैं। इस प्रकार १ से ३ श्लोक का सार यह कि ग्रह अपना शुभाशुभ फल अन्तर्दशा काल में किस प्रकार देता है। नीचे अवलोकन करें–

- दशेश के सम्बन्धी और सधर्मी ग्रह की अन्तर्दशा शुभफलदायी होगी। फिर दशेश के मित्र या अधिमित्र ग्रह की अन्तर्दशा भी शुभफलदायी ही होगी।
- दशेश के समधर्मी ग्रह की अन्तर्दशा मध्यम शुभफलद होगी। दशेश में समग्रह की अन्तर्दशा सामान्य फलदायी होगी।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- दशेश के विपरीत धर्म वाले या विरोधी ग्रह की अन्तर्दशा अपनी प्रकृति के अनुसार अशुभफलदायी होती है। दशेश में शत्रु या अतिशत्रु ग्रह की अन्तर्दशा भी अशुभद होगी॥ ३॥

अथ केन्द्रत्रिकोणयो: स्वामिनो: दशाफलमाह—

स्वदशायां त्रिकोणेशभुक्तौ केन्द्रपति: शुभम्।
दिशेत् सोऽपि तथा नो चेदसम्बन्धेन पापकृत्॥ ४॥

अन्वय: —सम्बन्धत्वात् केन्द्रपति: स्वदशायां त्रिकोणेशभुक्तौ च शुभं दिशेत् नो चेत् असम्बन्धेन पापकृत् भवति। तथा स: अपि॥ ४॥

संस्कृत—स्वदशायामिति— सम्बन्धत्वात् केन्द्रपति: लग्नचतुर्थ—सप्तम—दशमभवनस्वामी स्वदशायां आत्ममहादशायां, त्रिकोणेशभुक्तौ त्रिकोणाधीशस्यान्तर्दशायां शुभं शुभफलं दिशेत् दद्यात्। सोऽपि त्रिकोणेशोऽपि तथा पूर्ववत् फलं दिशेत् (अर्थात् स्वमहादशायां केन्द्राधीशान्तर्दशायां शुभं दिशेत्), नो चेत् सम्बन्धाभावश्चेत्, तदाऽसम्बन्धेन सम्बन्धरहितेन पापकृत् अशुभकृद् भवतीति शेष:॥

एतद्कथितमस्तियत् यदि केन्द्रेशाणां त्रिकोणपतिभि: सम्बन्ध: तदा केन्द्रपति: स्वदशायां तद् त्रिकोणेशान्तर्दशायां तथा त्रिकोणपतीनां स्वदशासम्बन्धि-केन्द्रेशान्तर्दशायां भाग्योदयरूपशुभफलं दिशेत्। सम्बन्धाभावत्वे सति धनहानिरूपाशुभं फलमेव द्वयोरवस्थायां भवति॥ ४॥

क्षेमङ्करी—केन्द्राधीश महादशानाथ अपनी दशा काल में सम्बन्धी त्रिकोणेश की अन्तर्दशा के समय शुभफल को देता है। वैसे ही दशेश त्रिकोणेश अपनी दशा काल में सम्बन्धी केन्द्रेश की अन्तर्दशा के समय शुभ फल देता है। इसके विपरीत अर्थात् केन्द्रेश व त्रिकोणेश यदि सम्बन्धी न हो, तब अपनी दशा में केन्द्रेश त्रिकोणेश की अन्तर्दशा के समय अशुभफल देता है। उसी प्रकार असम्बन्धी त्रिकोणेश की दशा में केन्द्रेश की अन्तर्दशा में अशुभफल ही प्राप्त होता है॥ ४॥

विमर्श—उपरोक्त का अभिप्राय यह हुआ कि केन्द्रेश की दशा और त्रिकोणेश की अन्तर्दशा में परस्पर सम्बद्ध होने पर जातक को शुभफल ही प्राप्त होता है। परन्तु असम्बद्ध रहने पर परस्पर अपनी अपनी दशा में केन्द्रेश या त्रिकोणेश की अन्तर्दशा में अशुभफल प्राप्त होता है। यहाँ यह निष्कर्ष मिलता है कि—

- केन्द्रेश अपनी व त्रिकोणेश की अन्तर्दशा में परस्पर शुभ सम्बन्ध होने

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पर शुभ फलदायी होता है। लेकिन केन्द्रेश व त्रिकोणेश में परस्पर अशुभ सम्बन्ध जैसे त्रिषडायेश या अशुभ भावेशों से भी किसी न किसी रूप में सम्बन्ध रखता हैं, तो वह अशुभ फल ही देगा।

- केन्द्रेश अपनी व दूसरे केन्द्रेश की अन्तर्दशा में परस्पर शुभ सम्बन्ध होने पर शुभ फलदायी होता है। लेकिन केन्द्रेश व अन्य केन्द्रेश में परस्पर अशुभ सम्बन्ध जैसे त्रिषडायेश या अशुभ भावेशों से भी किसी न किसी रूप में सम्बन्ध रखता है, तो अशुभ फल ही होगा।। ४।।

राजयोगस्यफलप्राप्तिकालमाह—

आरम्भो राजयोगस्य भवेन्मारक भुक्तिषु।
प्रथयन्ति तमारभ्य क्रमशः पापभुक्तयः।। ५।।

अन्वयः—यदि मारकभुक्तिषु राजयोगस्य आरम्भः भवेत्, तदा पापभुक्तयः तम् आरभ्य क्रमशः प्रथयन्ति।। ५।।

संस्कृत—आरम्भ इति— मारकभुक्तिषु मारकग्रहान्तर्दशासु राजयोगस्य आरम्भः समारम्भः यदि भवेत्तदा पापभुक्तयः पापग्रहान्तर्दशाः तं राजयोगम् आरभ्य क्रमशः, प्रथयन्ति विस्तारयन्ति। तत्राशयो विद्यते यत् मारकग्रहाः स्वदशायां मृत्युतुल्यं कष्टमेव दिशेत्। द्रव्यादिदातृत्वशक्तेरभावः मारकग्रहेषु भवति। यद्यपि मारकग्रहभुक्तिसु सम्बन्धत्वे सति शुभफलदातृत्वं प्रतीयते, तदा अपि द्रव्यलाभन् न सम्भवति, तत्काले तदन्तर्दशायां प्रतिष्ठायशवृद्धिरेव केवलं सम्भवति। तत्र मारकेशेतरग्रहाणाम् (अशुभग्रहणामपि) अन्तर्दशासु द्रव्यादीणां लाभमवश्यमेव भवति। अतः तात्पर्यमिदमस्ति यत् योगकारकग्रहाणां सम्बन्धीमारकपापशुभग्रहाणामन्तर्दशासु कस्मिश्चित्काले योगफलप्राप्तिसम्भावना विद्यते, परञ्च योगफलस्य गतिरथवा शुभत्वे सामन्जस्य सम्बन्धानुकूलेनैव कर्त्तव्यम्। यथायोगकारकदशायां सम्बन्धी-मारकग्रहान्तर्दशायां राजयोगस्य लक्षणं दृष्टं भवति, तत्पश्चात् पापान्तर्दशायां राजयोग फलमपि सम्प्राप्तं, तत्र यदा शुभान्तर्दशा सम्दृष्टं तदा जातकस्य यशप्रतिष्ठावित्तादिसमृद्धिं विशेषतया सम्भवितुमर्हतीत्यग्रिमश्लोके स्पष्टयति।। ५।।

क्षेमङ्करी—योगकारक की महादशा हो उसमें उसके सम्बन्धी मारक ग्रह की अन्तर्दशा हो, तो उसमें भी राजयोग का आरम्भ हो सकता है। तथा उस सम्बन्धी मारक की अन्तर्दशा से अधिक राजयोग सम्बन्धी पाप की अन्तर्दशा में उससे भी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अधिक राजयोग सम्बन्धी शुभ की अन्तर्दशा में होता है। अग्रिम श्लोक से अर्थ स्पष्ट है॥५॥

विमर्श—उपरोक्त का भाव है कि योगकारी ग्रह की महादशा में सम्बन्धी मारक की अन्तर्दशा में राजयोग का आरम्भ होने की पूरी सम्भावना होती है। उस क्रम में तब पापान्तर्दशा के आने पर राजयोग में वृद्धि हो जाता है, तत्पश्चात् सम्बन्धी शुभ ग्रह की अन्तर्दशा आने से उसमें यथेच्छ वृद्धि होती है। तात्पर्य यह कि योगकारक ग्रह के सम्बन्धी मारक, पाप और शुभ ग्रह की अन्तर्दशा में कभी भी योगफल का मिलना प्रारम्भ हो सकता है। लेकिन योगफल की तीव्रता या शुभता में सामञ्जस्य सम्बन्ध के अनुसार ही करना चाहिए। जैसे किसी योगकारक की दशा में सम्बन्धी मारक के आते राजयोग प्राप्त होने के लक्षण प्रकट होने लगेंगे, जैसे पाप ग्रह अन्तर्दशा में आया उसकी प्राप्ति भी हो गई, फिर जैसे ही शुभान्तर्दशा आयी कि यश प्रतिष्ठा, धन, समृद्धि के द्वार (कपाट) खुलने की सम्भावना उपलब्ध होने लगती है। आचार्य आगे इस बात को और स्पष्टता से कहते हैं।। ५।।

अथ पुनश्चराजयोगकालिमाह—

तत्सम्बन्धिशुभानां च तथा पुनरसंयुजाम्।
शुभानां तु समत्वेन संयोगो योगकारिणाम्।। ६।।

अन्वय: —तत्सम्बन्धिशुभानां भुक्तिषु तथा पुन: असंयुजां योगकारिणां शुभानां तु भुक्तिषु यदि संयोग: तदा समत्वेन तथा।। ६।।

संस्कृत—तत्सम्बन्धीति— तथा च तत्सम्बन्धि शुभानां (तत् तस्य राजयोगकारकग्रहाणां सम्बन्धिन: सहावस्थानादि सम्बन्धचतुष्टयान्तर्गतसम्बन्धविशिष्टा ये शुभग्रहास्तेषां) राजयोगकारक सम्बन्धिशुभग्रहाणां पुन: असंयुजां सम्बन्धरहितानां, योगकारिणां योग सम्पादयितृणां, शुभानां शुभग्रहाणां तु संयोग: दशान्तर्दशासंयोग: समत्वेन (नात्यपकर्षेण नात्युत्कर्षेण इति) फलं प्रथयन्तीति पूर्वश्लोकेन सम्बन्ध:। एवमाशय: योगकारकग्रहाणां महादशासु तत् सम्बन्धिशुभग्रहाणामन्तर्दशासु तथा योगकारकग्रहाणां महादशासु तदसम्बन्धिशुभग्रहाणामन्तर्दशासु मध्यमरूपेण फलं लभ्यत इति भाव:।। ६।।

क्षेमङ्करी—उपरोक्त योगकारक की महादशा में शुभ के अन्तर्दशा आने पर राजयोग के फलों में और वृद्धि हो जाती है। परन्तु असम्बन्धी शुभ से योगकारक का समान भाव है अर्थात् योगकारक की महादशा में असम्बन्धी शुभ की अन्तर्दशा हो

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथवा असम्बन्धी शुभ की महादशा में योग कारक की अन्तर्दशा हो, तो सामान्य शुभ से कुछ ही अधिक शुभ फल होता है।। ६।।

विमर्श—कुल मिलाकर यहाँ समझाया गया है कि योग कारक जितने ग्रह हैं, उसके सम्बन्धी शुभ ग्रहों की अन्तर्दशा में राजयोग का फल मिलता है, जबकि राजयोग कारक ग्रहों से सम्बन्ध न रखने वाले ग्रहों की अन्तर्दशा में सामान्य फल ही होता है। विशेष राजयोग घटित नहीं होता।। ६।।

अथ शुभदशायां योगकारकाणां फल विशेषतामाह—

शुभस्यास्य प्रसक्तस्य दशायां योगकारकाः।
स्वभुक्तिषु प्रयच्छन्ति कुत्रचिद्योगजं फलम्।। ७।।

अन्वयः—प्रसक्तस्य अस्य शुभस्य दशायां योगकारकाः स्वभुक्तिषु योगजं फलं कुत्रचित् प्रयच्छन्ति।। ७।।

संस्कृत—शुभस्यास्येति— प्रसक्तस्य सम्बन्धविशिष्टस्य अस्य योगकारकस्य शुभस्य शुभग्रहस्य दशायां महादशायां योगकारकाः योगकारक ग्रहाः स्वभुक्तिषु निजान्तर्दशासु कुत्रचित् कदाचित् योगजं राजयोगसमुत्पन्नं फलं प्रयच्छति ददाति अत्राशयोः विद्यते यत् दशाधिपति सम्बन्धत्वेन तु शुभग्रहणामन्तर्दशायां योगजं फलं यथा सम्भवति तथैव फलं सम्बन्धरहित शुभग्रहाणामन्तर्दशायामपि सम्भवति।। ७।।

क्षेमङ्करी—सम्बन्धी शुभ ग्रह की महादशा में योगकारक की अन्तर्दशा में कदाचित् कहीं कभी योगफल हो जाता है।। ७।।

विमर्श—उपरोक्त में कहने का अभिप्राय यह हो सकता है कि किसी भी शुभ ग्रह की महादशा में जब भी योगकारक ग्रह की अन्तर्दशा आती है, तब योगफल प्राप्त होने की सम्भावना अवश्य रहती है। व्यवहार में भी योगकारक ग्रह अपनी अन्तर्दशा कुछ में कुछ में शुभफल दे देते हैं।। ७।।

अथ राहुकेत्वोर्दशाफलनिर्णयमाह—

तमोग्रहौ शुभारुढ़ावसम्बन्धेन केनचित्।
अन्तर्दशानुसारेण भवेतां योगकारकौ।। ८।।

अन्वयः—केनचित् असम्बन्धेन शुभारूढौ तमोग्रहौ अन्तर्दशानुसारेण योगकारकौ भवेताम्।। ८।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृत—तमोग्रहाविति— केनचित् योगकारकग्रहेण असम्बन्धेन सम्बन्धरहितेन, शुभारूढ़ौ शुभस्थानगतौ तमोग्रहौ राहुकेतू, अन्तर्दशानुसारेण योगकारकमहादशायां स्वान्तर्दशायां योगकारकौ योगफलदायकौ भवेताम्। अत्राशयो विद्यते यत् राहुकेतू यदि केन्द्र त्रिकोणेषु, केन्द्रेश त्रिकोणेशानां सहावस्थितौ, तदा समुत्कृष्टभाग्ययोगकारकौ भवत:। तथा चानयो: दशा भाग्योत्तमवृद्धिकारकाऽपि भवत:। योगकारीग्रहदशायामपि अनयोरन्तर्दशाऽपि भाग्योदयकारकौ भवत:।। ८।।

क्षेमङ्करी—राहु-केतु केन्द्र या त्रिकोण में स्थित हो, किसी से सम्बन्ध भी नहीं करें, फिर भी राहु-केतु की महादशा में केन्द्रेश या त्रिकोणेश की अन्तर्दशा में अथवा केन्द्रेश या त्रिकोणेश की महादशा में राहु केतु का अन्तर योगफल प्रदान करने वाली होती है।। ८।।

विमर्श—यद्यद्भाव गतावि'ति के अनुसार राहु-केतु की मूल-प्रकृति अर्थात् उनकी नैसर्गिक स्वभाव है कि जिसभाव में स्थित हो, जिसभावेश के साथ युति करे, उनके प्रभाव द्वारा अपने को सक्रिय करते हैं। यह भी जानते हैं कि राहु केतु केन्द्रत्रिकोण के स्वामियों से सम्बन्ध कर योगकारी होते हैं। इसी कारण राहु-केतु अन्य ग्रहों से असम्बद्ध रहकर भी अपनी दशा- अन्तर्दशा में योग का फल अवश्य देते हैं।। ८।।

इति दोरमा (सहरसा) निवासिना
श्री सूर्यनारायणात्मजेन मैथिलेन डा. सुरकान्त झेत्यनेनुड्डदायप्रदीपे
सान्वय क्षेमङ्करीहिन्दीविमर्शेषुदशाफलाध्याय पंचम:।

❖ ❖ ❖

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मिश्रफलाध्यायः —६

अथ पापग्रहदशाफलविशेषतामाह—

पापा यदि दशानाथाः शुभानां तदसंयुजाम्।
भुक्तयः पापफलदास्तत्संयुक् शुभभुक्तयः।। १ ।।

अन्वयः —दशानाथाः यदि पापाः स्युः, तदा तद् असंयुजां शुभानां भुक्तयः पापफलदाः भवन्ति। तत् संयुक् शुभभुक्तयः मिश्रफलदा भवन्ति।। १ ।।

संस्कृत—पापा इति— दशानाथाः दशेश्वराः यदि पापा अशुभग्रहाः स्युस्तदा तदसंयुजां दशाधिपसम्बन्धरहितानां शुभानां शुभग्रहाणां भुक्तयः अन्तर्दशाः पापफलदाः अनिष्टफलप्रदाः भवन्ति। तत्संयुक् शुभभुक्तयः दशाधिपसम्बन्धिशुभग्रहान्तर्दशाः मिश्रफलदा मिश्रं शुभाशुभफलं ददातीति मिश्रफलदाः भवन्तीत्यग्रिमश्लोकेन स्पष्टीयते। अत्राशयो विद्यते यत् दशानाथो यदि पापग्रहाः (अर्थात् त्रिषडायाधीशाष्टमेशा इत्यर्थः) तेषां दशायां सम्बन्धरहितानां शुभ ग्रहाणामन्तर्दशाः पापफलं कुर्वन्ति। तत्रैव तत्सम्बन्धी शुभग्रहाः मिश्रितफलदा अर्थात् शुभाशुभदा कदा शुभ कदा अशुभं फलं ददन्ति ।। १ ।।

क्षेमङ्करी—पापी ग्रह की महादशा में असम्बन्धी शुभग्रह की अन्तर्दशा में पापफल होता है। वहीं सम्बन्धी शुभग्रह की अन्तर्दशा में शुभपाप मिश्रित फल होता है।। १ ।।

विमर्श—पापी ग्रह की महादशा में जब भी उससे सम्बन्धरहित शुभ ग्रह अपनी अन्तर्दशा में अशुभफल करता है। ऐसे में सम्बन्ध युक्त रहने पर भी मिश्रफल ही करता है, अर्थात् कभी शुभ और कभी अशुभ फल करते हैं। इसे अग्रिम श्लोक में स्पष्ट किया गया है।। १ ।।

अथ पापीदशेशानां भुक्तिविशेषतामाह—

भवन्ति मिश्रफलदा भुक्तयो योगकारिणाम्।
अत्यन्तपापफलदा भवन्ति तदसंयुजाम्।। २ ।।

अन्वयः —पूर्वोक्तं यत् तत् संयुक् शुभभुक्तयः मिश्रफलदा भवन्ति। तथा च तदसंयुजाम् योगकारिणां भुक्तयः अत्यन्तपापफलदा भवन्ति।। २ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृत—भवन्तीति— पूर्वोक्तं यत् तत्संयुक् शुभभुक्तय: दशाधिपस्य सम्बन्धी शुभग्रहान्तर्दशा:, मिश्रफलदा शुभाशुभफलं ददन्ति। तथा च तदसंयुजां तत्सम्बन्ध रहितानां योगकारिणां भुक्तय: अन्तर्दशा: अत्यन्तपापफलदा: अतिशयेन अनिष्टफलप्रदा: भवन्ति। अत्राशयो विद्यते यत् यदि पापग्रहा: त्रिषडायेशाष्टमेशा: तदा तेषां दशायां सम्बन्धरहितशुभग्रहाणामन्तर्दशा: अतिशयेनानिष्टफलप्रदा भवन्ति। तत्र सम्बन्धसहितानां ग्रहाणाम् अन्तर्दशा: मिश्रफलदा भवन्ति।। २।।

क्षेमङ्करी—असम्बन्धी योगकारक के अन्तर में अत्यन्त पापफल होता है। ऐसा ही सम्बन्धी योगकारक के अन्तर में पूर्ववत् शुभपापमिश्रफल कुछ शुभाधिक होता है।। २।।

विमर्श—पूर्व श्लोक का अर्थ इस श्लोक में स्पष्ट किया गया है कि पाप ग्रह की महादशा में सम्बन्धी शुभ ग्रहों की अन्तर्दशा आने पर मिश्रित फल होता है और असम्बन्धी योग कारक ग्रह की अन्तर्दशा आए, तो अत्यन्त अशुभ फल घटित होता है। इसकी मूल बातों को इस प्रकार समझा जा सकता है।

१. पापग्रह की महादशा में असम्बन्धी शुभ ग्रह की अन्तर्दशा में भी अशुभ फल ही मिलता है। यहाँ यह ध्यान रखने की बात है, कि सम्बन्धी शुभ ग्रह की अन्तर्दशा में मिश्रित फल होता है।

२. अन्तर्दशेश योग कारक है और पापी महादशा नाथ से सम्बन्ध रखता है, तो मिश्रित फल ही होगा।। २।।

अथ मारकभुक्तित:मारकत्वमाह—

सत्यपि स्वेन सम्बन्धे न हन्ति शुभभुक्तिषु।
